श्री गङ्गालहरी शतकं श्री गङ्गा माहात्म्यम् ।

श्रीमत्कविवरलक्ष्मीनारायणनिर्म्मितम् । महामहोपाध्यायत्रिवेदश्रीमत्पण्डितगुरुप्रसादनिर्म्मितया टीकयासहितम् ।

श्री काश्यां लहरीनामके सीसकाक्षरमुद्रायन्त्रालये ।

व्योमरसाङ्कभूसम्मिते वत्सरे १९६० चैत्रे शुक्ले ।

पूर्वस्यान्दिशिकाशीतो विषयेच्छपराभिधे । प्रसादीनामकेग्रामे स्वकीयेसाधुवासकृत् ॥ १ ॥

शरणगजनरक्षाबद्धमध्यःकृपालुर्वितरणरतचेता इन्द्रियोत्साहभेत्ता । निजकुलकमलार्कोलोकविख्यातकीर्तिः प्रचुररुचिरशीलोगोपवंशावतंसः ॥ २ ॥

श्रीतिलकरामनामाशीतलधामासुपूर्णपरकामः । श्रीशंकरवरभक्तस्सुकर्मरक्तः प्रधीरासीत् ॥ ३ ॥

तत्सूनुनोरुमतिनाधैर्य्यौदार्य्यादिसुगुणनिधिनेदम् । यदुनन्दनेननीतम्प्रकाशमिहनिजधनव्ययतः ॥ ४ ॥

पश्चिमदेशाभरणश्रीमद्भयहरपुराप्तजन्माऽयम् । श्रीकाशीपुरवासीलक्ष्मीनारायणःकविर्ज्जयति ॥ १ ॥

॥ शुभम्भवतुजगताम् ॥

ॐस्वस्तिश्रीगणपतयेनमः ॥ श्रीकाशीन्तत्पतिञ्चापि शिवंसेभास्यशैलजम् ॥ प्रणमामि गुरोः पादौ पितरौ चापि भक्तितः ॥ १ ॥ रामम्भक्तिप्रियं वन्दे सर्वस्वान्तैक-
साक्षिणम् ॥ कर्म्मोपक्रमपूर्त्यादिसिद्धिदम्परमं मनुम् ॥ २ ॥ इह खलु परमपरिनिष्ठित स्सद्गुणगणैकनिलयस्तत्रभवान्महानुभावः श्रीमाँल्लक्ष्मीनारायणाभिधान स्सुकविः ॥
नद्यश्चपर्वता स्सर्वे द्विरूपाश्च स्वभावतः॥ तोयं नदीनां रूपन्तु शरीरमपरन्तथा ॥ स्थावरम्पर्वतानान्तु रूपङ्कायस्तथाऽपरइति कालिकापुराणद्वाविंशाऽध्याय वचनप्रामाण्यात्॥
नदीस्वरूपद्विविधत्वमवगम्य ॥ तिस्रः कोट्योऽर्द्धकोटी च तीर्थानां वायुरब्रवीत् ॥ सर्वदा कलिकाले तु गङ्गायां नाऽत्र संशय इतिभविष्योत्तरवचनात् ॥ श्रीगङ्गास्तुत्यासकल
तीर्थस्तुतिरितिचावधार्य ॥ कलेर्दशसहस्रान्तेविष्णुस्त्यक्ष्यति मेदिनीम् ॥ तदर्द्धेजाह्नवीतोयन्तदर्द्धेग्रामदेवतेतिवचनार्थम् ॥ यावद्धरण्यान्तुलसी प्रपूज्यते गुरुर्न्नभस्थो दिवि
कल्पपादपः ॥ यावत्समुद्रे वडवानलश्च वसामि राजंस्तव चक्रस्वातइतिप्रायश्चित्ततत्त्वसमुद्धृतभविष्यपुराणवचनेन ॥ पृथिवी गङ्गया हीना भविष्यत्यन्तिमे कलौ ॥ तदैव

ॐ ॥ विधिरपि तव गङ्गे शीलयन्सद्गुणाब्धिं यदपि समयते नो तस्य पारङ्गमत्वम् ।
तदपि दुरितनुत्यै देवि तद्विन्दुनुत्यै चपलयति मनो मे त्वत्पदाब्जानुरागः ॥ १ ॥

विष्णुस्त्यजति मेदिनीं नरपुङ्गवेतिविष्णुपुराणवचनेनच ॥ कल्पान्तकलियुगपर्य्यंवस्थाप्यच ॥ आशीर्न्नमस्क्रिया वस्तुनिर्देशो वाऽपि तन्मुखमितित्रिविधमङ्गलमध्ये ॥ आदौ-
निर्विघ्नताद्यवाप्तये ॥ वहलप्रेमभरान्तःकरणविधेयस्तुत्यात्मकतया ॥ नमस्कारात्मकंश्रीगङ्गास्वरूपवस्तुनिर्देशात्मकञ्चेतिद्विविधंमङ्गलंमनसाविहितमपिशिष्यशिक्षार्थम् ॥
निवध्नन् ॥ चिकीर्षितं श्रीगङ्गालहरीशतकनामकं श्रीसुरधुनीमाहात्म्यस्तवमालक्षयति ॥ विधिरित्यादिना ॥ त्रिपु लोकेषु ॥ अविरतमविहतञ्च गच्छतीतिगङ्गा ॥ तत्सम्बुद्धौ ॥
हेगङ्गे ॥ मनुष्यादिव्यावृत्तये ॥ दीव्यतिस्वोदारगुणैश्शरणागततारकत्वादिभिरितरानाभिभवतीतिदेवी ॥ तत्सम्बुद्धौ हेदेवि ॥ देवतास्वरूपेइत्यर्थः ॥ यदपियद्यपि ॥ विधिरपि
सकललोकपितामह श्चतुराननोऽपि॥ अन्येषाङ्कथा ॥ तवसद्गुणाब्धिंसहृदयहृदयपरिचुम्बितनिखिलप्राणिसमुद्धारकत्वादिसमीचीनगुणाम्भोनिधिम्॥ शीलयन् गाहमानः॥
तव गुणगणं सम्यग्ध्यायन्विलोडयन्विचिन्तयन्निगदन्नितियावत् ॥ सन् ॥ तस्य तवसद्गुणाब्धेः पारङ्गमत्वमशेषावगाहनपूर्वकोत्तरकोटिनिवेशकर्तृत्वम् ॥ नोसमयतेनसङ्ग- ॥१॥

च्छति ॥ तदपि तथापि ॥ दुरितनुत्त्यै निजप्रबलकल्मषप्रहाणाय ॥ तद्विन्दुनुत्यै तस्य तव सद्गुणाब्धेर्विन्दुःपृषत् ॥ तस्य कस्यापि ॥ नुत्यैस्तुत्यै ॥ त्वत्पदाब्जानुरागस्त्वत्पादपद्मप्रीतिः ॥ मेमम ॥ मनोमानसम् ॥ चपलयत्युत्तरलीकरोति ॥ किम्बहुना ॥ एकोऽपि श्रीगङ्गागुणाब्धिविन्दुस्स्तुतस्त्वत्कृतार्थतायैपर्य्याप्तइतिद्रागितस्ततः प्रवर्तयतीत्यर्थः ॥ मालिनी छन्दः ॥ ननमयययुतेयंमालिनीभोगिलोकैरितिलक्षणात् ॥ १ ॥ इदानीं शरीरिधन्यत्वापादकं श्रीगङ्गायाध्यानश्चतुर्दशभिः कुलकेनाह ॥ तल्लक्षणन्तु ॥ द्वाभ्यां युग्ममिति प्रोक्त न्त्रिभिः श्लोकै विशेषकम् ॥ कालापकश्चतुर्भिस्स्यात्तदूर्द्ध्वंकुलकं स्मृतामिति ॥ विपुलेति ॥ हेदेवि भागीरथि रविकुलतिलकनृपातिवर भगीरथानीते ॥ ये केऽपि जनाः ॥ जितचित्तास्स्वायत्तीकृतमानसास्सन्तः ॥ सकृदेकवारमपि ॥ विपुलंमहत् ॥ विमलरोचिःस्वच्छदीप्ति च हैमंहेमनिर्म्मितश्चरत्नैर्म्मणिभिः उपत्तञ्चितश्च गेहं मन्दिरंयस्यास्सा तान्त्वाम् हृदयपद्मेहृत्कमले दधतिधारयन्ति ध्यायन्तीतियावत् तेजनाः कृतार्थाः कृतकृत्यास्सफलजन्मानः नकिम् अपितुकृतार्थाएवेतिपञ्चदशेनान्वयः

विपुलविमलरोचिर्हैमरत्नोपगेहां मृदुरुचिरमनर्घ्यम्पट्टवासोदधानाम् ललितकुसुमभूषाचैलसौवर्णकान्तिव्यजनचम-
रदण्डच्छत्रभास्वत्सखीकाम् ॥ २ ॥ मकरवरमहोद्यत्पृष्ठसंशोभितोच्चैः कलितमणिकलापस्वर्णपर्यङ्कसंस्थाम् स्फटि-
कविशदमूर्त्ति श्रीकृताशोकपूर्त्तिं स्मितमधुरमुखाब्जाङ्घ्रिश्रिदानम्रदृष्टिम् ॥ ३ ॥

एवमवशिष्टान्यपि विशेषणानि उत्तैरत्रपञ्चदशपद्यस्थेनत्वामितिविशेष्यपदेनयोज्यानि तथाहि मृदुसुकुमारंसुस्पर्शमित्यर्थः रुचिरंमनोहरन्दर्शनीयमित्यर्थः अनर्घ्यममूल्यम् च पट्टवासःकौशेयवसनम् उत्तरीयमितियावत् दधानामाच्छादयन्तीम् ललितानिपरमेप्सितानियानिकुसुमभूषाचैलानि पुष्पाभरणवासांसि सौवर्ण्याकान्त्यागौरवर्णया सर्वाङ्गीणया छायया व्यजनचमरदण्डच्छत्रैस्तालवृन्तकचामरयष्ट्यातपत्रैः यद्वा ललितैस्स्वरामणीयकशोभितैः कुसुमादिच्छत्रान्तैः भास्वन्त्यश्शोभनानाः सख्योवयस्यायस्यास्सातम् नद्यृतश्चेतिवहुव्रीहौकप् केणइतिप्राप्तस्यह्रस्वत्वस्य नकपीतिनिषेधः चमरश्चामरे स्त्री तु मञ्जरीमृगभेदयोरितिमेदिनी तथा चादिकविर्मुनिर्वाल्मीकिः वारस्त्रीभिश्च-मरमरुतावीजितांभूमिपालइति ॥ २ ॥ मकरेति मकरवरस्ययादोविशेषश्रेष्ठस्य मकरोयादसोभेदेनिधिराशिप्रभेदयोरितिमेदिनी महद्भिस्त्रितम् उद्यदत्युन्नतञ्च पृष्ठंशरीरस्य

पश्चाद्भागः महीसम्मुखोरस्स्थलत्वादुपरिप्रदेशइत्यर्थः तस्मिन् संशोभितस्सुस्थितस्त्वान्निरतिशायिसुषमाङ्कतोयः उच्चैर्म्महोत्सेधः कलितमणिकलापोविविधामूल्यरत्ननिकर खचितः स्वर्णस्पहेम्नः पर्यङ्कः तत्र सम्यक् सुखपूर्वकं सावकाशमित्यर्थः तिष्ठतीतिसाताम् स्फटिकवद्विशदाशुभ्रा मूर्त्तिः कायोयस्यास्साताम् मूर्त्तिःकायकाठिन्ययोस्स्त्रिया-मितिमेदिनी श्रीर्मोक्षैकलक्ष्मीः विभूतिस्समीचीनामतिर्वार्त्तद्विषपिणी कृतासम्पादिता या आशाचित्तवृत्तिविकारविशेषः तस्याः एका पूर्त्तिः अनन्यसम्पत्तिरूपा अथवा प्रधाना पूर्त्तिः पूरणंयस्याः सकाशात्साताम् यद्वा श्रियात्रिवर्गसम्पत्त्या कृताविहिता आशायाभक्तजनाभिलापस्य एकापूर्त्तिः पूरणंययासाताम् यद्वा श्रीभिर्न्निजातिहृदयङ्गमकलेव-रातिरुचिरशुभ्रदीप्तिच्छटाभिः श्री वेंशरचनाशोभाभारतीसरलद्रुमे लक्ष्म्या न्त्रिवर्गसम्पत्तिविधोपकरणेषु च विभूतौ च मतौ चेतिमेदिनी कृतासम्पादिता आशानां सर्वासा न्दिशाम् एकापूर्त्तिः पूरणं यया साताम् स्मितेन मधुरंमनोहरम् मुखमाननम् सादृश्यात् अब्जङ्कमलमिवयस्यास्साताम् किञ्चिदल्पतरमेव आसमन्तात् नत्वेकस्मिन्नेवप्रदेशे

कलितललितवेशस्त्रीकगन्धर्वराज द्विविधमधुरगानाकर्णनाश्च त्किरीटाम्
मणिमयसुरमौलिप्रस्फुरद्दीप्तिसम्प द्विलसद मलरत्नस्यूतहैमाङ्घ्रिपीठाम् ॥ ४ ॥

नम्राऽधोमुखी दृष्टि र्यस्या स्साताम् लोकोत्तरशीलसंवलितदृष्टिप्रसारामितियावत् ॥ ३ ॥ कलितेति कलितोधृतः ललितस्सुशोभनः निजलावण्यानुरूपइत्यर्थः वेशोवस्त्राल-ङ्कारादिप्रसाधनस्वरूपविशेषोनेपथ्योयाभिः वेशोवेश्यागृहेगृहे नेपथ्येचेतिमेदिनी तादृश्यस्स्त्रियोदेवललनाः सन्ति सम्पादिकाःसाभिनयनर्त्तनगानकर्त्र्योवायत्रतत् इत्येका विधा गन्धर्वाणान्तुम्बरुप्रभृतीनाम् राजानोऽधिपाःश्रेष्ठाइत्यर्थः हाहाद्याइतियावत् गायकायत्रतत् इतिद्वितीयाविधा तच्चतादितिकृत्वा द्विविधम् यद्वा कलितललितवेशास्स्त्रियो ललनायेषान्तेचते गन्धर्वास्सङ्गीतकर्म्मप्रधानादेवयोनिविशेषाहाहाद्याः विद्याधरोऽप्सरोयक्षरक्षोगन्धर्वकिन्नराः पिशाचोगुह्यकस्सिद्धोभूतोऽमीदेवयोनयइति हाहाहूहूश्चैव माद्यागन्धर्वास्त्रिदिवौकसामितिचामरः कपिपूर्ववत्स्त्रीशब्दस्येकारस्यनह्रस्वत्वम् तेषाम् राजत्साङ्गोपाङ्गत्वादतिशोभमानम् विविधंरागभेदाद्ग्रामस्वरादिभेदात्तत्तद्देशभेदा-द्वानानाप्रकारकम् मधुरंश्रवणेन्द्रियातिसौहित्यजनकम् यद्गानम् तस्य यदाकर्णनंश्रवणम् तेनाश्चल्लुयादौमन्दमन्दमुत्तमाङ्गधूननेनकिञ्चिच्चलत् किरीटंमुकुटंयस्याःसाताम् अथ ॥ २ ॥

मुकुटंकिरीटम्पुन्नपुंसकमित्यमरः मणिमयानानाविधामूल्यदिव्यरत्नखचिताये सुराणान्दर्शनसमर्चनार्थंसमागतानामिन्द्रप्रमुखानान्देवानाम् मौलयःकिरीटानि मौलिःकिरीटे धम्मिल्लेचूडायामनपुंसकम् नाऽशोकद्रौस्त्रियाम्भूमाविति मेदिनी तेषाम् स्फुरन्ती अविच्छिन्नन्देदीप्यमाना यादीप्तिसम्पत्प्रकाशसमृद्धिः तया विलसत्प्रणामावसरे तन्मौलिलग्नमणिकिरणपटलरूक्षितत्वादतीवशोभमानम् अमलैर्न्निर्दोषैरतीवस्वच्छैर्वा रत्नैर्न्नानाविधैः पुष्पराग हीरकवैदूर्यादिभिर्म्मणिभिः स्यूतम्परितोवद्धङ्खचितमितियावत् हैमंस्वर्णनिर्मितम् अङ्घ्रिपीठम्पर्यङ्कोपर्य्यवस्थितिसमयेपादपद्मद्वयाधारीभूतश्चरणचतुष्कशोभि कनकवरमणिमयम्फलकंयस्यास्सातास् ॥ ४ ॥ अथच मानवामौलितोवर्ण्यादेवाश्चरणतः पुनरितिकविकल्पलतोक्तकाविसम्प्रदायानुसरणेन देवतानाम् चरणतस्समारभ्यवर्णनीयत्वंसमालोच्य ततएव सुरासुरवन्दनीयांश्रीभागीरथीन्देवतांवर्णयति लसदेति लसन्तस्संस्फुरन्तः अमलानाम्परमस्वच्छानाम् मरीचीनाम् चरणाभरणानांमणिमयत्वात् किरणानाम् व्राताः पटलानियास्सुताः सौवर्ण्योजातरूपमय्यः राजन् श्रवणमात्रा

लसदमलमरीचिव्रातसौवर्णराजन्मधुरिमरवनानापादपाथोजभूषाम् । मणिखचितविमृष्टस्वर्णकाञ्चीमयूखस्फुरद-
भिनवशाटीशोभितश्रोणिदेशाम् ॥ ५ ॥ अभिनवगजमुक्तायष्टिदीप्तिप्रसारस्फुरदसितसुचोलक्रान्तवैदूर्य्यकान्ताम् ।
मणिनिकरचकासत्स्वर्णकेयूरनानाविधवलयविराजद्बाहुविद्योत्तमानाम् ॥ ६ ॥

देवत्वदयाह्लादसम्पादकत्वादतिशोभमानः मधुरिमामाधुर्य्यंयस्य तादृशोरवश्शब्दश्शिञ्जितमितियावत् यासान्तास्तथोक्ताश्च नानाबहुविधाः पादपाथोजयोश्चरणपङ्कजयोः भूषाभूषणानिनूपुरादीनियस्यास्सातथोक्तातास् मणिभिर्म्मरकतादिभीरत्नैः खचितावद्धा विमृष्टासमुज्ज्वलीकरणसाधनपाषाणविशेषसङ्घर्षणादिनासम्पादितातिनैर्म्मल्या स्वर्णकाञ्चीहाटकमेखला तस्यामयूखैरंशुभिः स्फुरन्तीदेदीप्यमाना याऽभिनवाऽतिनूतना शाटीपरिधानमधोवस्त्रमित्यर्थः तयाशोभितस्सञ्जातच्छविः श्रोणिदेशःकटिप्रदेशः लक्षणयानितम्बबिम्बंवायस्यास्सातथोक्तातास् कटिश्श्रोणिःककुद्मतीत्यमरः ॥ ५ ॥ अभिनवेति अभिनवास्सद्योविनिस्सृताः याः गजमुक्ताःकरिराजकुम्भमौक्तिकानि तासांयायष्ट्यो हारलतापरम्पराः यष्टिः पुंसिस्याद्भुजदण्डके द्वयोर्हारलताभाग्यर्मधुकाशस्त्रभेदयोरितिमेदिनी तासाम् दीप्तिप्रसारैः प्रकाशविस्तारैः स्फुरन्नतिविलसन् असितोगौरच्छव्य-

त्तुरूपोमेचकवर्णोयस्सुचोलः कण्ठाद्धस्तिप्रदेशपर्यन्तंलम्बमानः कुचमण्डलमात्रव्याप्तोवाशो भमानःकूर्पासकः चोलःकूर्पासकोऽस्त्रियामित्यमरः तत्र कान्तैस्सीवनसाधनलोह मयसूच्यादिरन्ध्रप्रोतहेमादिसूक्ष्मतन्तुसन्नद्धैः वैदूर्यैर्विदूराख्यदेशोत्पन्नैः पीतवर्णैर्मणिविशेषैः कान्तांसुशोभमानाम् मणिनिकरैरनेकविधरत्नसमूहैः चकासतोविद्योतमानाः स्वर्णस्यकाञ्चनस्य केयूराण्यङ्गदानि केयूरमङ्गदन्तुल्येइत्यमरः नानाविधावहुविधाः वलयाः कटकानि चूडिकाद्यपरनामधेयानिभुजभूषणमात्रणीत्यर्थः तेषान्तेषाञ्चेतरेतरयोगं विधाय तैराजन्तोऽतिवन्धुराः येवाहवोभुजाः तैर्विद्योतमानामतीवप्रकाशमानाम् ॥ ६ ॥ अथश्लोकद्वयेनलक्षणविशेषलक्षितांश्चतुरोहस्तान्वर्णयति चलदित्यादिना चलत् सौरभ्यवशंवदत्वादितस्ततोबम्भ्रम्यमाणम् अलीनाम्भ्रमराणाम् कुलंसमूहोयत्रतादृशम् फुल्लंविकसत् प्राज्यसौरभ्यम्बहुलामोदसम्भृतञ्चयत्पद्मान्दिव्यकमलम् तस्य प्रचलेन परिभ्राम्यमाणत्वादिवस्ततः प्रचलता विमलेनसाधुप्रक्षालनात्पङ्कलवेनाप्यपाकृतेनातिस्वच्छेनेतियावत् नालेनदण्डेन नालाननापद्मदण्डे इतिमेदिनी। भ्राजितश्शोभितः अवामो-

चलदलिकुलफुल्लप्राज्यसौरभ्यपद्म प्रचलविमलनालभ्राजितावामहस्ताम् । भवभयपरिखिन्नस्वान्तसंशुद्धिवाञ्छा
शरणगजनसान्त्वप्रस्फुरद्वामहस्ताम् ॥ ७ ॥ सुमणिशकलभास्वत्स्थूलमुक्ताफलस्त्र ग्शुचिरकनककुम्भभ्राजिवामोर्द्ध्व
हस्ताम् । सुरचनवरमुद्राचारुदक्षोर्द्ध्वहस्ता मतिमृदुकरशाखाराजमानोर्म्मिकौघाम् ॥ ८ ॥

वामेतरोदक्षिणः उपरितनस्यवक्ष्यमाणत्वादधस्तनएवान्नहस्तःकरोयस्यास्सातास् भवस्यजन्ममरणादिवहुविधदुःखप्रवाहरूपस्यसंसारस्य यद्भयम्भीतिः तेनाखिन्नन्दीनतामुप- गतम् यत्स्वान्तंहृदयम् तस्य या सम्यक् ब्रह्मविदूब्रह्मनिष्ठसद्गुरुसमुपदेशपूर्वकम् शुद्धिस्सर्वक्लेशप्रहाणातिनिर्वृतियोग्यतासम्पादकं नैर्म्मल्यम् तस्याः वाञ्छयासमभिलाषेण शरणगानिजरक्षितृविश्वासेन समागतायेजनाः तेषांसान्त्वायसादराभयप्रदानाय स्फुरन्नुन्नमन् वामोहस्तोयस्यास्साताम् अत्रापिपूर्ववदधस्तनएव ॥ ७ ॥ सुमणीति शोभना- मणयोमरकतादयः तेषाम् यानिशकलानिखण्डानि अणुदीर्घावयवाइत्यर्थः तेषाम् भासोदीप्तयः विद्यन्तेयस्यासौयद्वास्वखचितैस्तैः भास्वान्देदीप्यमानश्चासौ स्थूलमुक्ताफलस्त्र- ग्शुचिरोऽतिपुष्टगजमौक्तिकमालातिरमणीयश्चासौकनककुम्भःकाञ्चनकलशः तेनभ्राजतेतच्छीलः वामोदक्षिणेतरः ऊर्द्ध्वउपरितनः हस्तोयस्यास्साताम् सुरचनाशोभनावयव ॥ ३ ॥

संस्थानसुभगा या वरमुद्राऽभिलषितार्थप्रदानचिह्नाकृतिः तया चारुरतिरमणीयः दक्षोदक्षिणपार्श्वस्थः ऊर्द्धउपरिस्थःहस्तोयस्यास्सताम् अतिमृद्योऽतिकोमलाः याः कर शाखाअङ्गुल्यः अङ्गुल्यःकरशाखास्स्युरित्यमरः तासु यथायोग्यम् राजमानस्स्वर्णमणिमयत्वादतिशोभमानः ऊर्म्मिकौघोऽङ्गुलीयकसमुदायः नतुप्रत्यङ्गुल्येकैकोर्म्मिकेत्यर्थः यस्यास्सताम् अंगुलीयकमूर्म्मिकेत्यमरः ॥ ८ ॥ धवलेति धवलावलक्षा विमलास्वच्छा कान्तिस्फूर्त्तिर्दीप्तिच्छटास्फुरणम् यस्यास्तादृशी या उरस्सूत्रिकामुक्ताफलस्रग्विशेषः अथोरःस्सूत्रिकामौक्तिकैः कृतेत्यमरः तया आढ्यांयुक्ताम् मणयो नानाविधानिरत्नानि कनकं स्वर्णञ्च स्वोपादानकारणम् तैश्शोभमाना भाद्युतिः यासाम् तास्तथाभूताः कण्ठ भूषानानाविधानिकण्ठाभरणानि दधानान्धारयन्तीम् कनकेनहेम्ना कलिताघटितायेतन्तवःसूक्ष्मतरसूत्राणि तेषु प्रोताग्रथितायेमुग्धाच्छमुक्तानिकरा स्सुन्दराविमलमौ-क्तिकव्रजाः मुग्धस्सुन्दरमूढयो रित्यमर तैरुचिराकाम्यमाना या कम्बुग्रीविका शङ्खनिभा रेखात्रयवती कन्धरा कम्बुग्रीवात्रिरेखासेत्यमरः तयारोचमानामतिशोभायु-

धवलविमलकान्तिस्फूर्त्युरस्सूत्रिकाढ्यां मणिकनकमुभासः कण्ठभूषा दधानाम् । कनककलिततन्तुप्रोतमुग्धाच्छमुक्ता निकररुचिरकम्बुग्रीविकारोचमानाम् ॥ ९ ॥ सरसतरुणबिम्बद्योतिसूक्ष्मौष्ठबिम्बां नवतरविमलाश्वत्सज्जपापुष्प-जिह्वाम् । परिणतशुकचञ्चूचारुमुक्ताविभूषा स्फुरदगुरुविराजन्नासिकाराजमानाम् ॥ १० ॥

ताम् ॥ ९ ॥ सरसेति सरसमन्तस्साररससम्भृतम् तरुणम्प्ररूढम् यत् बिम्बम्बिम्बिकाफलम् तद्वद्द्योतिनौ शोणिम्नाऽतिप्रकाशशीलौ सूक्ष्मौ तनुतरौ ओष्ठौरदनच्छदावेवबि-म्बौमण्डलीभूतौयस्यास्सा यद्वा तद्वद्द्योति सूक्ष्मयोरोष्ठयोः बिम्बंमण्डलंयस्यास्सताम् बिम्बन्तुप्रतिबिम्बेऽपिमण्डलेपुन्नपुंसकम् बिम्बिकायाःफलेक्लीबङ्कलासेपुनःपुमानिति मेदिनी नवतरंसद्योजातम् विमलंरजोविरहितम् अश्वत्सुभगतयापूजितंस्तुतमितियावत् सत् सरन्ध्रत्वादिदोषरहितम् यत् जपापुष्पमोड्रपुष्पम् अत्रजपाशब्दोवद्वितीयोऽपि ओड्रपुष्पञ्जवेत्यमरः ओड्रपुष्पेऽपिवृक्षेऽपिजवाशब्दः प्रकीर्त्तितइतित्रिकाण्डशेषः जवावेगवतित्रिषु पुल्लिङ्गस्तुभवेद्वेगेचौड्रपुष्पेजवास्मृतेतिमेदिनी पद्वितीयपाठेतु जवायान्तुज-पाक्स्त्रियामितिधर्म्मदासः ओड्रपुष्पन्तुजपेतिहेमचन्द्रः जवास्याज्जपयासहेतिशब्दभेदप्रकाशः अथच जपाशब्देनवाड्रपुष्पग्रहणेपुनःपुष्पशब्दःप्रशस्तपरोऽनुसन्धेयः करिकलभ

इत्यादौकैरिपदवत् वस्तुतस्तु ओड्रोजनेजपापुष्पे ओड्रःख्यातोजवापुष्पे इतिहेमचन्द्रमेदिनीकरोक्तिपर्य्यालोचनेनपुष्पान्तोऽपिजपाशब्दस्साधीयानेव तथाच भगवान्कालिदासः पश्चादुच्चैर्भुजतरुवनंमण्डलेनाभिलीनस्सान्ध्यन्तेजः प्रतिनवजपापुष्परक्तन्दधानः नृत्यारम्भेहरपशुपतेरार्द्रनागाजिनेच्छां शान्तोद्वेगस्तिमितनयनन्दृष्टभक्तिर्भवान्येति तद्वत् जिह्वारसनायस्यास्साताम् यद्वा शाकपार्थिवादित्वाद्रक्तपदलोपोऽत्रबोध्यः रसज्ञारसनाजिह्वेत्यमरः तथाचसौन्दर्य्यलहर्य्यांश्रीमान्शङ्कराचार्यः जपापुष्पच्छायातवजननिजिह्वाजयतिसेति परिणतापरिपाकावस्थापन्ना याशुकचञ्चूः कीरत्रोटिः चञ्चूस्त्रोटिरुभेस्त्रियामित्यमरः तद्वच्चारुरतिसुभगा मुक्तामौक्तिकमेव विभूषाभूषणम् तयास्फुरन्तीदेदीप्यमानाच अगुरुरगुर्वी वा तन्वी अतएवविराजन्ती यानासिका तया राजमाना शोभमानाताम् स्थलत्रयेपुंवद्भावः ॥ १० ॥ विविधेति विविधैरनेकविधैः विमलैर्मलरहितैः भास्वद्भिः प्रकाशमानैः धृष्णिभिः किरणैः देदीप्यमानानि पुनः पुनरतिशयेनवाद्योतमानानि यानि प्रियाणि लोकस्वान्तरञ्जकानि मणीनाम् तनूनिसूक्ष्माणि खण्डा

विविधविमलभास्वद्धृष्णिदेदीप्यमान प्रियमणितनुखण्डस्यूतहैमावतंसाम् ।
श्रुतिकलितमनोज्ञस्वच्छराजत्पलाश स्फुटमरकतकान्तिस्पर्द्धिदिव्याब्जयुग्माम् ॥ ११ ॥

निशकलानि तैस्स्यूतौनिबद्धौ खचितावित्यर्थः हैमौस्वर्णमयौ अवतंसौकर्णभूषणविशेषौ यस्यास्साताम् अवतंसोनस्त्रियांस्यात्कर्णपूरेचशेखरे इतिमेदिनी यद्वा विविधानिविमलानि भास्वद्धृष्णिदेदीप्यमानानिरविकिरणद्योतमानानि यानि प्रियमणितनुखण्डानि तैस्स्यूतौहैमावतंसौयस्यास्साताम् किरणोस्त्रमयूखांशुगभस्तिघृणिधृष्णयः भानुःकरोमरीचिस्स्त्रीपुंसयोर्दीधितिःस्त्रियामित्यमरः अत्र धृष्णिशब्दे ञिधृषाप्रागल्भ्ये इत्यस्मात्कर्त्तरि बाहुलकान्निर्गुणाभावश्चावगन्तव्यः वृष्णिरितिपाठे वृषुसेचने इत्यस्मात् सृवृषिभ्यांकिदितिनिः किच्च पृष्णिरित्येकेपेठुः अत्र स्पृशस्पर्शने अस्य सलोपोगुणाभावश्च घृणिपृश्नीतिनिपातितः पर्शाति पृशुसेचनेवा श्रुतिकलितङ्कर्णधृतम् मनोज्ञानिस्वच्छानिराजन्ति प्रकाशमानानिच पलाशानिदलानियस्यतत् पत्रम्पलाशञ्छदनन्दलम्पर्णञ्छदःपुमानित्यमरः स्फुटंविकचम् मरकतस्यमणेः कान्त्यास्पार्द्धि कान्तेर्वास्पार्द्धि तत्पराभवेप्सु अनिर्वचनीयनीलिमेतियावत् अत्रयद्यपि मरकतमणिसाम्यात्पलाशेषुहरितवर्णत्वंसमायाति तथापि कमलासम्पदोः कृष्णहरितोर्नागसर्प्पयोः पीतलोहितयोः स्वर्णपरागाग्निशिखादि ॥४॥

षु इत्यादिनाऽलङ्कारशेखर कृद्विहितः हरितकृष्णयोरभेदोऽवगन्तव्यः दिव्यमलौकिकम् अब्जयोर्यन्नीलयोःकमलयोःयुग्मंयुगलम् यथा सातम् ॥ ११ ॥ तनुतरेति तनुतराण्यतिसूक्ष्माणि वराणिदर्शनीयानि सान्द्राणिनिविडानि नतुविरलानि श्यामानिमेचकानि सुस्निग्धानि अतिमसृणानि यानिपक्ष्माणि नेत्रप्रावरणलोमानि तैःप्रचुरैरुचिरैवहुल रमणीये यद्वा तनुतरादिविशेषणविशिष्टानि पक्ष्माणिययोः तथाभूते अतएव प्रचुररुचिरे कनीनिकाभिप्रायेण भृङ्गभ्राजमानाम्बुजेऽइवमध्यस्थभ्रमरशोभमानपद्मेऽइव अक्षिणीनेत्रेयस्यास्सातामू नेत्रत्रयकल्पनायान्तु विशेषणानिविशेष्याणिचवहुवचनान्तानिविधायसमासः कर्त्तव्यः कुसुमशरस्यपुष्पवाणस्यत्रिभुवनविजयिनः श्रीकामदेवस्येत्यर्थः विराजन्नतीवमनोहरः दृप्तोनिखिललोकविजयाद्गर्वितोयश्चापोधनुः तस्याभिमानन्त्रिभुवनविजयोत्थन्दर्प्पम् छिनत्तिनिजकौटिल्यादिशोभया दूरीकरोतीतितथोक्ता भिदिविदिच्छिदेः कुरजिनिकुरच् छिदुरश्छेदनद्रव्येधूर्त्तेवैरिणिचत्रिषु इतिमेदिनी साचासौनिविडाऽतिसान्द्राच नीलाऽतिश्यामलवर्णाच भ्रूलताभ्रूवल्लीतस्याः द्वन्द्वेनयुगलेन रम्या

तनुतरवरसान्द्रश्यामसुस्निग्धपक्ष्म प्रचुररुचिरभृङ्गभ्राजमानाम्बुजाक्षीम् । कुसुमशरविराजद्दृप्तचापाभिमानच्छिदुर
निविडनीलभ्रूलताद्वन्द्वरम्याम् ॥ १२ ॥ शिशुशिशिरखरांशुप्रोल्लसच्चारुबिम्ब प्रतिभटतिलकोच्चैःकान्तिपुञ्जातिकान्ताम् । जलदपटलमुक्तस्वच्छरश्मीन्दुखण्ड च्छविविजयधुरीणप्रोल्लसद्भालदेशाम् ॥ १३ ॥

मनोज्ञरूपा ताम् ॥ १२ ॥ शिश्विति शिशुर्बालः प्रातःकालिकइत्यर्थः शिशिरस्यऋतोः खरांशुर्म्मार्त्तण्डः तस्य प्रोल्लसद्देदीप्यमानम् अतएव चारु अतिहृदयङ्गमम् यत् विम्बंमण्डलम् तस्यप्रतिभटस्सिन्दूरादिप्रकृतिकत्वात्प्रतिस्पर्द्धी यः तिलकोविशेषकम् तमालपत्रतिलकचित्रकाणि विशेषकम् द्वितीयञ्च तुरीयञ्च न स्त्रियामित्यमरः तस्य उच्चैर्महान् यः कान्तिपुञ्जोदीप्तिप्रसारः तेन अतिकान्ताऽतिसुभगस्वरूपा ताम् जलदपटलमुक्तस्य वारिदापवारणरहितस्य स्वच्छरश्मेः प्रस्फुरत्किरणस्य इन्दुखण्डस्य चन्द्रार्द्धभागस्य या छविर्द्युतिः तस्याः विशेषेणनिश्शेषतया जयेपराभवविशेषे धुरीणोधुरन्धरोऽतिकुशलः अतएव प्रोल्लसन्प्रकाशमानः भालदेशो ललाटप्रदेशः यस्यास्सा ताम् भालं स्याल्ललाटे मद्दस्यपीतिहेमचन्द्रः ॥ १३ ॥ ललितेति ललिताअतिकमनीयाः ललितामन्दमन्दं स्फुरिताः भृङ्गश्रेणिवन्नीलाश्यामाः अमला रजोलेशेनाप्यस्पृष्टाः ज्वयन्तो देदी-

प्यमानाः मृदुलाः कोमलस्पर्शाः कुटिलाश्चलदुरगकुमारवद्वक्राः सूक्ष्मस्वच्छमुक्तास्तनुतरातिविमलमौक्तिकग्रथिताः अलकाश्चूर्णकुन्तलायत्र अलकाश्चूर्णकुन्तलाइत्यमरः तादृशमास्यंमुखंयस्या स्सातामू रुचिरकिरणैर्म्मनोहरमयूखैः चञ्चन्देदीप्यमानोयोरत्नवारोविविधमणिसमूहः तेन उल्लसदतिदीप्तिभृत् सत्समीचीनम् लोकोत्तररचनमित्यर्थः कनककलितंस्वर्णं निर्म्मितम् अतएव भास्वद्दीप्ति प्रौढप्रचण्डमार्त्तण्डप्रकाशम् अतएव राजदतिशोभमानम् यद्वा भास्वतोदीप्तिरिवयादीप्तिः तया राजत् तादृशम् किरीटमुत्तमाङ्गस्थंमुकुटं यस्यास्सा ताम् ॥ १४ ॥ रुचिरेति रुचिराः मुकुटकोटिपुकिरीटशिखरेषु रुचिरस्यमुकुटस्यकोटिष्वितिवा प्रस्फुरन्त्यस्सर्वतः प्रसरन्त्यः चित्तहारिण्यो मानसाकर्षिण्यः स्फुटाविकसिताः सुरभयोघ्राणतर्प्पणाः विसारिण्योदशसुदिक्षुविसरणशीलाः स्फाराविपुलाः स्फारस्तुस्फरकादीनाम्बुद्बुदेविपुलेऽपिचेतिहेमचन्द्रः मन्दारमालास्सुरतरु-

ललितकुलितभृङ्गश्रेणिनीलामलोद्य न्मृदुलकुटिलसूक्ष्मस्वच्छमुक्तालकास्याम् । रुचिरकिरणचञ्चद्रत्नवारोल्लसत्सत्कन-
ककलितभास्वद्दीप्तिराजत्किरीटाम् ॥१४॥ रुचिरमुकुटकोटिप्रस्फुरच्चित्तहारिस्फुटसुरभिविसारिस्फारमन्दारमालाम् ।
सकृदपिजितचित्तादेविभागीरथित्वान्दधतिहृदयपद्मेयेनाकिन्तेकृतार्थाः ॥ १५ ॥ भगवतितवतीरम्प्रोच्छलत्स्वच्छनी-
रम्मृदुसुरभिसमीरंसाधुकूजत्सुकीरम् । कुसुमिततरुवारम्प्रोल्लसद्वल्लिभारंवरमति रघिसारङ्गोजहात्यार्त्तिहारम् ॥ १६ ॥

पुष्पस्रजोयस्यास्सातामू उत्तरार्द्धन्तुद्वितीयपद्यव्याख्यावसरेव्याख्यातमेव समाप्तकुलकम् ॥ १५ ॥ अथध्यानंवर्णयित्वा इदानींसप्तभिः श्रीगङ्गान्तीरसौभाग्यवर्णनव्याजेन स्तोतुकामः प्रथमन्तीरत्यागानर्हतांवर्णयति भगवतीति हेभगवति पूर्णैश्वर्य्यादिगुणषट्कशालिनिगङ्गे प्रकर्षेण उच्छलन्त्युद्गच्छन्ति स्वच्छान्यतिनिर्म्मलानि नीराणिजलानि यस्मिंस्तत् मृदवोमन्दगतयस्सुस्पर्शावा सुरभयस्तत्रत्यवारिजादिसम्पर्कात् घ्राणतृप्तिकरगन्धशोभिनः समीराःपवनायत्रतत् साधुसम्यक् कूजन्तोऽतिमधुरंशब्दङ्कुर्वाणाः अतएव शोभनास्स्वरूपेणापिरमणीयाः कीराश्शुकायत्रतत् कुसुमानिपुष्पाणि सञ्जातान्येषान्तेकुसुमितास्सञ्जातपुष्पाः पुष्पभरमनोहराइत्यर्थः तदस्यसञ्जातन्तारकादिभ्यइ-तजितीतच् तरुवारास्तालतमालादिवृक्षसमूहायत्रतत् प्रोल्लसन्बहुशोभमानः वल्लीनांनानाविधानाम्पुष्पभरभूषितानांलतानाम् भारोबाहुल्यंयत्रतत् अधिकास्त्रिभुवनमण्डलाद-

तिरिक्तः सारस्स्थिरांशस्स्वर्गादिप्रदातृत्वलक्षणोयत्रतत् यद्वा अधिकंयथास्यात्तथा सारंवरम् त्रिभुवनवर्त्तिनिपदार्थजातेऽतीवश्रेष्ठमित्यर्थः सारो वले स्थिरांशे च मज्जिन पुंसि जले धने न्याय्ये क्लीवन्त्रिषु वरे इतिमेदिनी अर्त्तीस्सांसारिकीःपीडाः हरतिसमूलञ्छिनत्तीति तथाभूतम् कर्म्मण्यण् तव तीरन्तटम् कर्म्म वरा विवेकशालिनी मतिर्म्मनीषा यस्यसतथोक्तः विवेकीत्यर्थः कोजहातित्यजति नकोऽपीतिभावः एतत्त्यागात्यागाभ्यामेव अविवेकित्वविवेकित्वपरीक्षाजनानामितितात्पर्यार्थः अत्र विशेषणसप्तकेन श्रीगङ्गा तीरस्य सप्तलोक्युत्तमत्वंसूचितम् अत्रानुप्रासविशेषानिर्वाहाय नसमाप्तपुनरात्तत्वन्दोषावहम् ॥ १६ ॥ अथचान्यत्रवासिनः सार्वभौमादपि श्रीगङ्गायास्तटवासिजनोत्कर्षवर्ण-नव्याजेनतांस्तौति उटजामिति हेदेवि गङ्गे त्वत्तटेत्वत्तीरे यःकोपिमनुष्यः जितमनाविषयानाकृष्टान्तःकरणः भैक्षवृत्तिर्भिक्षालब्धान्नकृतभोजननिर्वाहश्चसन् भैक्षम्भिक्षाकदम्ब कमित्यमरः उटजमपिपर्णशालामपि विधायनिर्म्माय पर्णशालोटजोऽस्त्रियामित्यमरः वसतिवासम् कुरुते तस्यसाम्यन्तुल्यताम् नृपतीनांमण्डलेश्वराणाम् मुकुटकोटिभिः

उटजमपि विधाय त्वत्तटे देवि गङ्गे वसति जितमना यो भैक्षवृत्तिर्म्मनुष्यः नृपतिमुकुटकोटिस्पृष्टपादाब्जपीठ

स्सुवसतिरपि सम्राट् तस्य किं याति साम्यम् ॥ १७ ॥ तवतटकुहरेऽयन्दर्दुरस्सन्निषण्णस्सुरभिपवननीतत्वत्तरङ्गा

म्बुसिक्तः सुरयुवतिगृहीतैश्चन्दनार्द्रैस्सरत्नैःपरिहसतिसुरेशं वीजितन्तालवृन्तैः ॥ १८ ॥

किरीटाग्रैः स्पृष्टम्प्रणामावसरे लब्धसंस्पर्शम् पादाब्जपीठश्चरणकमलाधारकनकमणिमयचतुष्पादोविष्टरोयस्यसतथोक्तः विष्टरः पीठमस्त्रियामितित्रिकाण्डशेषः शोभनारजत स्वर्णमणिमयत्वादतीवरमणीयाः वसतयोदुर्गप्रासादादीनिनानाविधानिसदनानियस्यसतथोक्तः सम्राट् चक्रवर्त्तीराजेतियावत् अन्यत्रस्थितइतिशेषः यातिप्राप्नोतिकिम् नया-तीत्यर्थः अनेनराज्यसुखभोगान्तेसम्राजोनिरयाधिगमः नानाव्रतोपवासादिदुःखानुभवजनितमनःपीडांविनैव श्रीगङ्गातटवासमहिम्नैव श्रीगङ्गातटवासिनः स्वर्गादिलाभयोग्य ताधिगमश्चसूचितः ॥ १७ ॥ अथच कदाचिज्जलविहारमहोत्सवादौ श्रीगङ्गातटविवरस्थितम्भेकंसमवलोक्य तस्येन्द्रतोऽपिसमुत्कर्षतावर्णनव्याजेनभागीरथींस्तौति तवेति हेगङ्गेइत्यनुवर्त्तनीयम् तवतटकुहरेप्रवाहोपरितनकुल्याकारतीरविवरप्रदेशे [illegible] सुखोपविष्टः अथच सुरभिपवननीतेनतत्रत्यसरसिजादिसौरभ्यसंव-

लितमारुतसमाकृष्टेनत्वत्तरङ्गाम्बुनाभवदीयवीचिजलेन सिक्तः कृतसेकः अयम्पुरोवर्त्तीमदक्षिगोचरः दर्दुरोमण्डूकः भेकेमण्डूकवर्षाभूशालूर प्लवदर्दुराइत्यमरः सुरयुवतिगृहीतैर्देववधूटीकरधृतैः चन्दनार्द्रैर्दिव्यपाटीरपङ्कसरसैः सरत्नैः कनकमयत्वात् नानाविधमणिखचितैः तालवृन्तैर्व्यजनैः व्यजनन्तालवृन्तकमित्यमर; वीजितंलब्धकृत्रिममन्द पवनस्पर्शसुखम् सुरेशन्त्रिभुवनाधिपतिमिन्द्रमपि अन्येषाङ्काकथा परिहसति बहुलतरदुःखलब्धनाकीयविषयभोगासक्ततया क्षीणपुण्यः पुनःपुनर्जन्ममरणयोग्यतामापन्नोऽयं सुरराट् श्रीगङ्गाजलबिन्दुस्पर्शक्षीणाशेषसंसृतिनिदानदुरितावितरस्यमोक्षाधिकारिणस्तिर्यग्योनिमापन्नस्यापिममसादृश्यम्प्राप्नोतिकिमित्युपहासङ्कुरुते अनेन श्रीगङ्गातट वासिनोदर्दुरस्यापि ईदृशीस्थितिश्चेत्तर्हि तथाभूतस्यमानवस्यकाकथेतिसूचितम् ॥ १८ ॥ अथश्रीगङ्गायास्तटप्राप्तौसत्यांनिजमुक्तौसन्देहोनविधेयइतिप्रतिपादनद्वारातांस्तौति शरणेति हेभगवतिगङ्गे शरणंरक्षकङ्गच्छन्तीति शरणगाआश्रयम्प्राप्ताः शरणङ्गृहरक्षित्रोरित्यमरः तेचतेजनाश्चमनुजास्तेषाम् यावाञ्छामनोरथपरम्परा तस्याः पूरणेसमग्रस

शरणगजनवाञ्छापूरणौदार्य्यपूर्णम्भगवति समुपेत्य त्वत्तटम्भाग्ययोगात् । पुनरपि निजमुक्तौ सन्दिहाना जना ये
शिवशिव मतिरेषा न्देवि गङ्गे गता क्व ॥१९॥ जननि पुलिनदेशस्तेतरङ्गैर्विमुक्त स्सुरभिमृदुलशीतस्वान्तत्द्वातयुक्तः।
बृहदजिनसमूहैरास्तृतो जह्नुकन्ये मुनिवरगणरम्यो नाऽस्ति चेतोहरःकिम् ॥ २० ॥

म्पादने यदौदार्य्यन्दानशूरत्वम् तेनपूर्णमुपचितम् सम्भृतमितियावत् त्वत्तटम्भवत्तीरप्रदेशम् कर्म भाग्ययोगात् जन्मान्तरीयपुण्यौघपरिपाकवशात् समुपेत्यप्राप्यापि निज मुक्तौ आत्मनोभवबन्धनान्निर्मोक्षे पुनः तथोक्तत्वत्तटावाप्त्यनन्तरम् येजनाः सन्दिहानास्सञ्जातसंशयाः अस्माकंमुक्तिर्भविष्यतिनवेतिकोटिद्वयदोलायमानमानसाइत्यर्थः भवन्तीतिविशेषः हेदेविगङ्गे शिवशिवेतिखेदे आश्चर्य्येवा एषाम् मुक्तिप्रदन्त्वत्तटङ्गत्वाऽपिमुक्तिसन्देहङ्कुर्वाणानाम् मतिर्विचारचतुराबुद्धिः क्वगता नतेमतिमन्तइत्यर्थः अनेन श्रीगङ्गातटंमुक्तेस्साधनान्तरानपेक्षंसाधनमितिसूचितम् तदुक्तङ्कौर्म्मे कलौगङ्गैवगङ्गैवकलौगङ्गैवकेवलम् कःकलौमुक्तिमाप्नोतिगङ्गासेवांविनानरइति ॥ १९ ॥ अथसलिल वर्जितत्वात्तटाव्यवहितसंसर्गित्वाच्च पुलिनमपितदान्तःपातित्वेनवर्णयन्गङ्गांस्तौति जननीति हेजननिमातेवसर्वदैवहितकारिणि जगदुत्पादनप्रभावशालिनिवा हेजह्नुकन्ये ॥ ६ ॥

जह्नुनामकराजर्षिसमनुगृहीतपुरस्सञ्चारे तरङ्गैरूर्मिभिः मुक्तश्शनैश्शनैः परित्यक्तः सुरभिभिस्सर्वतस्समानीतजलजादिवरामोदभरत्वात्सुगन्धिभिः मृदुलैस्सुखप्रदस्पर्शैः शीतै स्तपः क्लेशापहारिशैत्यसुभगैः अतएव स्वान्तह्लादिभिस्तत्रत्यजनमनः प्रियैः वातैस्सर्वतोऽविच्छिन्नंसमागच्छद्भिर्म्मारुतैः युक्तोऽयास्तः बृहदाजिनसमूहैस्साङ्गोपाङ्गविशालकृष्ण मृगादिचर्म्मपरम्पराभिः आस्तृतः कृतास्तरणः मुनिवराणान्तपश्चर्यापरायणानांवेदतत्त्वावगन्तॄणाम् गणैः तत्रतत्राजिनास्तरणेषुकृताधिष्ठानैस्समूहैः रम्यस्सञ्जातशोभातिशयः तेतव पुलिनदेशः सद्योवारिनिर्गतरोधस्समीपस्थप्रवाहभूम्यन्तर्वर्त्तिप्रदेशविशेषः तोयोत्थितन्तत्पुलिनमित्यमरः चेतोहरोद्रष्टृजनानांहृदयलोभनः नास्तिनभवतिकिम् अस्त्येवेतिकाकुः अनेनगङ्गापुलिनस्यतत्त्वज्ञजनसमाश्रयत्वेनचतुर्वर्गसम्पत्साधनत्वंसूचितम् उक्तञ्चनारदीये किमष्टाङ्गेनयोगेनकिन्तपोभिः किमध्वरैः वासएवहिगङ्गायाम्ब्रह्मज्ञानस्यकारणमिति ॥२०॥ अथश्रीगङ्गायास्तीरासेवेभङ्ग्यन्तरेणजन्मसाफल्यसम्पादकत्वमुपपादयंस्तांस्तौति विबुधेति हेविबुधानान्देवानांनदिसरित् श्रीगङ्गइत्यर्थः येमनुजाः

विबुधनदि किमेतैरम्बुजन्मोपमेतैः परिलसदपवादै र्न्निष्फलै र्हन्त पादैः ।
वृहदघहृतिधीरं स्वर्म्मदध्वंसितीर न्तव न सकृदयन्ते ये मुधाऽथो रमन्ते ॥ २१ ॥

तव वृहतांमहताम् अघानाम्पापानाम्ब्रह्महत्यादीनाम् ब्रह्महत्यासुरापानंस्तेयङ्गुर्वङ्गनागमः महान्तिपातकान्याहुस्संसर्गश्चापितैस्सहेतिमनुः अस्त्रीपङ्कम्पुमान्पाप्मापापङ्किल्विषकल्मषम् कलुषंवृजिनैनोऽघमंहोदुरितदुष्कृतमित्यमरः हृतिर्हरणम् तत्र धीरंसर्वथैवसमर्थम् स्वस्स्वर्गस्य मदोगर्वःसमुन्नतसुखाधिष्ठानत्वजनितमानसोत्सेकस्वरूपः मदोरेतसिकस्तूर्याङ्गर्वेहर्षेभदानयोरितिमेदिनी तन्ध्वंसयतिविनाशयतितिरस्करोतितच्छीलन्तत्तथोक्तम् तीरंरोधः कर्म सकृदेकवारमपि न अयन्तेनगच्छन्तिनाप्नुवन्तीतियावत् अथो अथच मुधाव्यर्थम् क्षणिकसुखार्थमित्यर्थः रमन्तेक्रीडन्ति इतस्ततोभ्रमन्तीत्यर्थः हन्तेतिखेदे यत्तदोर्न्नित्यसम्बन्धात् तेषांमनुजानाम् अम्बुजन्मनःकमलस्य उपमांसादृश्यम् इतैःप्राप्तैः द्वितीयेतियोगविभागात्समासः परिलसन्नुद्बुद्धः अपवादः श्रीगङ्गातीरमगताव्यर्थमितस्ततोभ्रमतः पादान्धिगितिनिन्दायेषान्तैः अतएव निष्फलैर्व्यर्थजन्माभिः एतैः दृश्यमानैः पादैश्चरणैः किम् नकिमपिफलमित्यर्थः यद्वा येपादाः उक्तलक्षणन्तवतीरम् न अयन्ते अथो मुधारमन्ते तैरुक्तस्वरूपैः एतैःपादैः किमितियोजना अनेन

येसकृदपिस्नानायश्रीगङ्गाञ्जगताः तेव्यर्थंपादाः पङ्गवएवेतिसूचितम् ॥ २१ ॥ अथश्रीगङ्गातीरेदानमाहात्म्यवर्णनव्याजेनश्रीगङ्गांस्तौति सुरेति हेसुरतटिनि देवनदि गङ्गे ये जनाः ते तव तटे तीरभूप्रदेशे सादरमादरेणसह नतिप्रीतिवचनादिपूर्वकमित्यर्थः गोहिरण्यादीनान्धेनुस्वर्णादीनाम् आदिनाऽश्वरत्नरजतवसनादिग्रहः दानैस्स्वस्वत्वनिवृत्ति पूर्वकम् मूल्यं विना परसत्त्वसम्पादनलक्षणैः क्षितिविबुधवरा न्स्वकर्मनिष्ठान्विप्रवरान् तर्प्पयन्ति सन्तोषयन्ति ते जनाः उभयकुलपितॄन्मातापितृवंशपूर्वपुरुषान् सद्यस्तत्-क्षणमेव उद्धृत्य निरयादिभ्योनिस्सार्य अमरदुरापन्देवैर्दुष्प्रापम् क्षीणतापन्द्वन्द्वादिदुःखविरहितम् पदंवैकुण्ठशिवलोकादिस्थानम् ब्रह्मस्वरूपं वस्तु वा पदंव्यवसितित्राण स्थानलक्ष्माङ्घ्रिवस्तुष्वित्यमरः नो व्रजन्ति न प्राप्नुवन्ति किम् व्रजन्त्येवेतिकाकुः अनेन सर्वतीर्थेभ्यःश्रीगङ्गातीरेदानस्यलोकोत्तरफलोत्कर्ष स्सूचितः ॥ २२ ॥ अथैकत्रिंशता श्रीगङ्गाजलमाहात्म्यवर्णनद्वाराश्रीगङ्गांस्तोतुमारभते तत्रादिमेनश्रीगङ्गाजलस्यत्रिलोकीसारत्ववर्णनव्याजेनश्रीगङ्गांस्तौति त्रिभुवनेति हेगङ्गे तावकन्त्वदीयम् वारि जलम्

सुरतटिनि तटे ते गोहिरण्यादिदानैः क्षितिविबुधवरान्ये सादरन्तर्प्पयन्ति । उभयकुलपितॄंस्ते नो किमुद्धृत्य सद्यः
पदममरदुरापङ्क्षीणतापं व्रजन्ति ॥ २२ ॥ त्रिभुवनपरिधानन्तावकं वारि गङ्गे त्रिभुवनसुनिधान न्तावकं वारि
गङ्गे । त्रिभुवननतिभूमि स्तावकं वारि गङ्गे त्रिभुवनसुखभूमि स्तावकं वारि गङ्गे ॥ २३ ॥

आपस्स्त्रीभूम्निवार्वारिसलिलङ्कमलञ्जलम् पयःकीलालममृतञ्जीवनम्भुवनंवनम् कबन्धमुदकम्पाथःपुष्करंस्सर्वतोमुखम् अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् मेघपुष्पङ्घ नरसइत्यमरः त्रयाणाम्भुवनानांलोकानाम् स्वर्गभूमिपातालाख्यानाम् परिधानन्तत्रवर्त्तमानत्वादधोयस्त्रंनग्नतापहारकमित्यर्थः अस्तीतिशेषः अन्नेऽप्येवम् भवन्नीराभावेनग्न जनवदशोभमानान्येवभुवनानिस्युः परिधानमेवसर्वश्रृङ्गारशिरोरत्नम् तत्तुत्रिभुवनस्यभवद्वार्येवेतिभावः अन्तरीयोपसंव्यानपरिधानान्यधोंऽशुकइत्यमरः पुनः हेगङ्गे तावकं वार्येव त्रिभुवनस्य शोभनमितरनिधानेभ्यो विलक्षणं निधानं रत्नादिसञ्चयस्थानमस्ति नकेवलस्परिधानवद्वातिशोभाविधानमात्रेण जनाभिप्रेतार्थनिर्वाहकम् किन्तुसर्वसामर्थ्य ॥ ७ ॥
सम्भृतत्वाल्लोकोत्तरनिधानरूपतयासकलाऽभीप्सितप्रापकमित्यर्थः पुनः हेगङ्गे तावकंवार्येव त्रिभुवनस्य सकलत्रिलोकीसुखसाधनमस्ति पक्षपातविरहेणसर्वजन्तुसमुद्धार-

कत्वात् त्रिभुवनस्यलोकोत्तरसुखसमुत्पादकमित्यर्थः अनेन श्रीगङ्गाजलस्य त्रिभुवनसर्वस्वत्वंसूचितम् ॥ २३ ॥ अथदुर्द्धरदुःखनिवारणैकक्षमश्रीगङ्गाप्रवाहेनिजभक्तिम्प्रार्थ यमानःश्रीगङ्गांस्तौति अपेति हेत्रिदशनदि देवनदि श्रीगङ्गे यः तावकस्त्वदीयः वारिपूरो जलप्रवाहः एकएवासहायएव अनपेक्षितसाधनान्तरइत्यर्थः दृष्टमात्रो दर्शनाविषय तामात्रतामापन्नएव कृतानिविहितानि गुरूणिमहान्ति ब्रह्महत्यादीनि दुरितानिपापानियैः तेषाञ्जनानांमानवानाम् रौरवाद्याधिकारंरौरवप्रभृतिनरकपतनयोग्यताम् अपहरति दूरीकरोति पुण्यलोकगतियोग्यतापादनेननिवारयतीतियावत् तस्मिंस्तावके महति लोकोत्तरगौरवे पूजनीये च वारिपूरे मदीयम् मानसमन्तःकरणम् सानुरागं सभक्ति भावम् भवतु अनेनगङ्गाप्रवाहदर्शनमात्रस्यैवदुरितनिवारकत्वं सूचितम् ॥ २४ ॥ अथवारिपूरस्यकावार्त्ताश्रीगङ्गाजलस्यकणिकाऽपिजन्मजन्मान्तरसम्पादितपातकनिवारणे-

अपहरति यएको दृष्टमात्रो जनानाङ्कृतगुरुदुरितानां रौरवाद्याधिकारम् । त्रिदशनदि मदीयं मानसं सानुरागम्भव-
तुमहति तस्मिंस्तावके वारिपूरे ॥ २४ ॥ तनुतरमपि गङ्गे तावकं हन्ति नीरम्बहुजनिजनितानाम्पातकानां समूहान् ।
परिमितिपरिहीणन्तूलराशिं न किं वा दहति कथय मातर्वह्निलेशोऽप्यशेषम् ॥ २५ ॥ सुरसरिदतिदूरन्तावकं वारिपूर
ङ्कथमपि ननु वातो याति संस्पृश्य यत्र । तदवनिसमुपेता जन्तवोऽप्यन्तकालेकिं मुन सुरवधूटीमानसं मोदयन्ति ॥ २६ ॥

ऽतीवशक्तेतिवह्नितूलदृष्टान्तेनवर्णयन् श्रीगङ्गांस्तौति, तनुतरेति हेगङ्गे तनुतरमपि स्वल्पतरमपि कणिकामात्रमपीत्यर्थः तावकम् नीरञ्जलम् बहुजनिजनितानामसङ्ख्यातजन्म जन्मान्तरोपार्जिनाम् पातकानाम्पापानाम् समूहान् राशीन् हन्ति समूलमुन्मूलयत्ति स्नानपानाद्युपभोगक्षमस्यतस्यकावार्त्तेतिभावः उक्तार्थे दृष्टान्तन्दर्शयति हेमातर्मदेक शरणस्वरूपेजननि वह्निलेशः कणिकामात्रस्वरूपोऽपिपावकः स्पर्शमात्रादेव परिमितिपरिहीणमपरिमितम् तूलराशिङ्कर्प्पाससमूहम् अशेषन्निश्शेषंयथास्यात्तथा नैवदहति किंवाभस्मसान्नैवकरोतिकिंवेतित्वङ्कथयवद दहत्येवेतिकाकुः अपिरेवकारार्थे अनेनावाप्तजलकणाअपिनिष्पापाभवन्तीतिसूचितम् ॥ २५ ॥ अथश्रीगङ्गाजलस्पृष्टपवनस्पृष्टादूर देशस्थाअपिजनाः स्वर्गाद्यवासियोग्याभवन्तीतिवर्णयन् श्रीगङ्गोत्कर्षनिरूपयति सुरसरिदिति हेसुरसरिद्गङ्गे तावकम्भवत्सम्बन्धिनम् वारिपूरञ्जलप्रवाहम् कथमपि केनापि

प्रकारेण गतिस्वभावान्मेघादिप्रेरणावसरेवा नतुनिश्चयेन संस्पृश्य वातः पवनः अतिदूरंयथास्यात्तथा यत्रयस्यामवनौ यातिप्राप्नोति साचासाववनिश्चेतितद्वनिस्तान्तद्वनिम् समुपेतास्सम्प्राप्ताः जन्तवोऽपिकृमिकीटादयः प्राणिनोऽपि अन्तकाले प्राणोत्क्रमणावसरे समागमसम्भावनामात्रेणापीतिभावः सुरवधूटीनान्देवयुवतीनाम् मानसंमनः न मोदयन्ति किमु मोदयन्त्येवेत्यर्थः अनेन श्रीगङ्गास्पृष्टमारुतपवित्रीकृतदेशवासिनोऽपि प्राणिनः स्वर्गसुखमनुभवन्तिचेत्तर्हितत्कृतस्नानादयस्तदनुभवन्तीतिकिमुवक्तव्यमिति सूचितम् ॥ २६ ॥ अथचलोकोत्तरशक्तिशालिश्रीगङ्गाजलप्रसादादात्मनः पावित्र्यम्प्रार्थयमानः श्रीगङ्गांस्तौति सकलेति हेद्युतटिनि स्वर्गतरङ्गिणि श्रीगङ्गे सकलानि सम्पूर्णानि सर्वाणि वा त्रीणीत्यर्थः नत्वेकन्द्वेवा भुवनानि लोकान्स्वर्गादीन् पुनाति स्वकीयसञ्चारवशात्पवित्रीकरोतीतितथोक्तम् स्वर्गमुख्यान्नाकादीन् आलयान्स्थानानि वैकुण्ठादीनां मुख्यपदेनग्रहः अवति स्वस्नानादिसम्भृतपुण्यप्राणिप्रापणाद्रक्षति भूषयति वा तत्तथोक्तम् प्रबलानि महोत्कटानि दुरितानिपापानि लुनातिच्छिनत्तीतितत्तोक्तम् स्वावबोध

सकलभुवनपावि स्वर्ग्गमुख्यालयावि प्रबलदुरितलावि स्वावबोधैकभावि । शशिभृदलिकचारि स्वान्तसंशुद्धिकारि द्युतटिनि तव वारि स्तान्ममैनोऽपहारि ॥ २७ ॥ अयि भगवति गङ्गे देवि राजत्तरङ्गे गुणविजितमहेश न्तावकं वारिलेशम् । कथमपि दधते ये प्राणिनो भालदेशे यमशिरसि पदन्ते किं न धृत्वोद्व्रजन्ति ॥ २८ ॥

मात्मज्ञानम् एकंमुख्यम् भावयति स्वोपभोगजनितान्तःकरणशुद्धिद्वारासंसारनिवर्त्तकन्तत्त्वज्ञानञ्जनयतीतितत्तथोक्तम् अतएव शशिभृतोऽमृतांशुधारिणस्त्रिभुवनार्चितचरण सरसिजस्य श्रीमहादेवस्य अलिके ललाटे चरतिवर्त्तते विलसतीतियावत् तत्तथोक्तम् ललाटमलिकङ्गोधिरित्यमरः स्वान्तानांस्वसेविजनमनसाम् सम्यक्शुद्धिस्संसृतिनिदान-कषायमलराहित्यम् करोतिविदधातीतितथोक्तन्तत् तव वारिजलम् ममत्वदेकपरायणस्यनिजकिङ्करस्य एनांसिजन्मजन्मान्तरसञ्चितानिजन्ममरणादिदुःखजनकानिपापानि अपहरतीतितथोक्तम् नादृशम् स्याद्भवतु अत्रसर्वत्रशीलार्थेणिनिः अत्रविशेषणषट्केन श्रीगङ्गाजलसेविनोजनस्य षड्डूर्मिराहित्येनाशिवमयत्वंसूचितम् ॥ २७ ॥ अथश्रीगङ्गा जललवादरमहिम्नायमादपिनिर्भयत्वन्दर्शयन् श्रीगङ्गांस्तौति अयीति अयीतिकोमलामन्त्रणे भगवति गङ्गे देवि राजत्तरङ्गैः शोभमानवीचिपरम्परे इतिप्रेमप्रवाहनिमग्नतया

सम्बुद्धिचतुष्टयंयुगपदेवकविरवदत् येप्राणिनोजीवाःतावकम्भवदीयम् गुणैश्शरणागतसमुद्धारकत्वादिभिश्शुभ्रत्वादिभिर्वा विजितस्स्वायत्तीकृतःमहेशःकोटिब्रह्माण्डनायकः श्रीशङ्करो येन स तम् वारिणो जलस्य लेशःकणस्तम् लवलेशकणाणवइत्यमरः भालदेशेमस्तकप्रदेशे कथमपिकेनापिप्रकारेण नतुश्रद्धयैव दधतेधारयन्ति तेप्राणिनः यम-शिरसि लोकोत्तरदर्प्पसमुद्धतेप्रेतराजमूर्द्धप्रदेशे पदंस्वकीयश्चरणम् धृत्वा तदीयंशासनमनादृत्येत्यर्थः उत् उर्द्धम् सद्गतिमितियावत् नव्रजन्ति किम् व्रजन्त्येवेतिकाकुः अनेनश्रीगङ्गाजललवादरमहिम्नादण्डधरदण्डदण्डनेकुशलत्वस्प्राणिनामितिसूचितम् ॥ २८ ॥ अथच कविः कदाचित् श्रीगङ्गातीरंसमासाद्य तदीयजलदर्शनमात्रेणैवात्मानङ्कृ-तार्थंमन्यमानः स्नानपानादिप्रवृत्तौव्यवस्थान्दर्शयंस्तांस्तौति विबुधेति हेविबुधनदि प्राणिनाञ्जन्तूनाम् शरण्येशरणागतजनरक्षणसाध्वि जह्नुकन्ये भगवति यदिचेत् तेतव अम्बुजलम् दृष्टंस्वदृगोचरीकृतम् तर्हि किंस्नानपानादिकर्म शिष्टमवशिष्टम् नकिमपीत्यर्थः त्वदम्बुदर्शनमात्रेणैवकृतार्थत्वात् किन्तद्वशिष्टमितिपाठेतु तत्तर्हि किंवशिष्टम-

विबुधनदि शरण्ये प्राणिनाञ्जह्नुकन्ये भगवति यदिदृष्टन्तेऽम्बु किन्तर्हि शिष्टम् । तदपि हृदयरागाद्गर्हणोच्छित्तये वा जननि तव पयोभिः पावयाम्येतदङ्गम् ॥ २९ ॥ कृतभुवनविहारं शम्भुशीर्षप्रचार न्निखिलनिगमसार न्देवि सन्तोषकारम् । समुपचितनदीन ञ्जीवनन्तावकीनं श्रयतु बहुलमीन म्मानसं मामकीनम् ॥ ३० ॥

वशिष्टमितिसपवार्थः भागुरिमते अवाकारलोपोऽप्यवगन्तव्यः तदपितथापि हेजननिमातः हृदयरागादन्तःकरणभक्तिभराद्धेतोः वाऽथवा गर्हणायाअयङ्गङ्गास्नानादिकंनकुरुतेऽतोनास्तिकएवेतिनिन्दायाः उच्छित्तयेनिवारणायानुत्पत्तयइत्यर्थः तव पयोभिर्जलैः एतदितिशरीरस्यहस्तेननिर्देशः अङ्गङ्गात्रम् अङ्गमन्तिकगात्रयोः उपसर्जनभूतेस्यादप्यु-पायप्रतीकयोः अङ्गोनीवृद्धिशेषेस्यादितिहेमचन्द्रःपावयामिसर्वथैवपवित्रीकरोमीत्यर्थःअनेन श्रीगङ्गाजलदर्शनमात्रमेव सर्वश्रेयस्सम्पादकमिति सूचितम् ॥२९॥ अथ श्रीगङ्गा-जलैकलग्नमनस्कताम्प्रार्थयन् श्रीगङ्गांस्तौति कृतेति हेदेवि दीपनशीले त्रिभुवनक्रीडाभूमे वा श्रीगङ्गे मानकीनम्मदीयम् मानसञ्चेतः कृतोविहितः भुवनेषुत्रिषुलोकेषु विहारो-मनोविनोदायविहरणंयेन तत् यद्वा कृताभुवनानान्तात्स्थ्यलक्षणया भुवनान्तर्गतानाञ्जनानाम् विनागरुडाख्येनपक्षिणा शकुन्तिपक्षिशकुनिशकुन्तशकुनद्विजाः पतत्रिपत्रिपतग-

पततपत्त्ररथाण्डजाः नगौकोवाजिविकरविविष्किरपतत्त्रयः-नीडोद्भवागरुत्मन्तः पित्सन्तोनभसङ्गमाइत्यमरः हारोहरणंवैकुण्ठप्रापणंयेनतत् त्रिभुवनजनान्देहावसानेविष्णुरूपान्विधायविष्णुलोकंनीतवादितिभावः शम्भोस्सकललोककल्याणविधायिनस्सुरासुरनरनमस्कृतस्यश्रीशिवस्य शीर्षेमूर्द्धि प्रकर्षेणनिखिलस्वसेविसमुद्धारकत्वोत्कर्षेण चरति विहरतीतितत्तथोक्तम् यद्वा तत्रप्रचारस्सानन्दंविहारोयस्यतत् उत्तमाङ्गंशिरश्शीर्षंमूर्द्धानामस्त्रकोऽस्त्रियामित्यमरः निखिलानांसर्वेषाञ्चतुर्णामितियावत् निगमानामृगादीनां वेदानाम् निगमोवाणिजेपुर्याङ्कटेवेदेवणिक्पथेइतिमेदिनी सारस्प्रमेयंवस्तु सर्ववेदप्रतिपादितमाहात्म्यमित्यर्थः सन्तोषंस्वजनस्यवाञ्छापूर्त्याऽतीवाह्लादम् करोतीतितत्तथोक्तम् कर्मण्यण् समुपचितस्सम्यग्वर्द्धितः नदीनामिनःपतिर्नदीनस्सरित्पतिस्समुद्रोयेनतत् उक्तञ्चभारतेवनपर्वणि चतुरधिकशततमाध्यायारब्धागस्तिपीतसमुद्रकथावसरेनवाऽधिकशततमाध्याये समासाद्यसमुद्रञ्चगङ्गयासहितोनृपः पूरयामासवेगेनसमुद्रंवरुणालयमिति इनः पत्यौनृपार्कयोरितिमेदिनी बहुलाबह्वः मीनामत्स्याः यत्रतत् मीनादि

अमृतममरलोके देवि केचिद्वदन्ति प्रचुरतरतरङ्गे केचिदेवेन्दुबिम्बे ।
सुकविवचसि केचित्केचिदेवाङ्गनौष्ठे त्रिभुवननुतमम्भस्तेऽस्ति तन्मे मतन्तु ॥ ३१ ॥

सञ्चारशोभितमित्यर्थः तावकन्त्वदीयम् जीवनञ्जलम् कर्म श्रयतुसेवताम् अनेनश्रीगङ्गाजलस्यसर्वथैवसर्वजनाश्रयणीयत्वंसूचितम् ॥ ३० ॥ अथश्रीगङ्गाजलेऽमृतत्वंव्यवस्थापयन् श्रीगङ्गांस्तौति अमृतमिति हेदेविगङ्गे केचित्पौराणिकाजनाः अमरलोकेदेवलोके स्वर्गेइत्यर्थः अमृतङ्क्षीराब्धिनिस्सृतांसुधाम् वदन्ति पौराणिकीभिःकथाभिर्निरूपयन्ति हेप्रचुरतरतरङ्गे बहुलतरवीचिशोभिते मातर्गङ्गे केचित्तु ज्योतिस्सिद्धान्तवेत्तारो जनाः इन्दुबिम्बेऽमृतांशुमण्डले तत् वदन्ति सुधामयरश्मिस्पर्शमात्रेण सर्वौषधीपोषकत्वेनप्रतिपादयन्तीत्यर्थ केचित्तु प्राचीनकविनिर्म्मितसरसकाव्यनाटकादिलग्नैकमानसा स्सहृदयाः सुकवीनांशक्त्यादिकाव्यनिर्माणहेतुसम्पन्नसत्काव्यकर्त्तृणाञ्जनानाम् वचसि अतिसरसमनोहरपदसन्दर्भे तत् वदन्ति कथयन्ति केचित्तु रसालङ्कारशास्त्रनिष्णातबुद्धयो विद्वांसः अङ्गनायालोकोत्तरलावण्यभरभूषितायाअभिनवयौवनसौभाग्यातिशयगर्वितायाललनायाः ओष्ठेऽधरबिम्बे तत् वदन्ति विविधोक्ति[illegible]प्रतिपादयन्ति वस्तुतस्तु तदमृतङ्किमितिमत्तः पृच्छसि ॥ ९ ॥

चेत्तर्हि समाकर्णयेत्यभिमुखीकृत्याह मेममम मतं सिद्धान्तस्तु मतंस्यात्सम्मते ज्ञाते इतिमेदिनी त्रिभुवनजुतङ्कृमिकीटादिसर्वसाधारणसमुद्धारकत्वमहिमातिशयेनात्रिलोकी स्तुतम् तेतव अम्भोजलम् पूर्वोक्तन्तुनतादृगित्यभिसन्धिः तदमृतम्पीयूषमस्तीतिज्ञेयम् अनेनानितरवार्त्तिस्वाश्रितसद्गतिप्रापकत्वोक्तामृतवादिपरिणुतत्वाभ्यांश्रीगङ्गाम्भय- वामृतमितिसूचितम् ॥ ३१ ॥ अथश्रीगङ्गाजलोपयोगात्साक्षान्महेश्वरविग्रहावगतिंवर्णयन् श्रीगङ्गांस्तौति जननीति हेजननि सर्वेभ्योनिर्विशेषम्पयोदानात्त्रिभुवनमातर्गङ्गे तव पयोभिर्न्नीरैः पक्षेक्षीरैश्च पयःक्षीरेचनीरेचेतिहैमः सङ्गतानां स्नानपानाद्युपयोगावसरेमिलितानाञ्जनानाम्प्राणिनाम् शशिभुजगपिनाकव्याघ्रचर्म्मैणभूतीरभिनवसुधांशु हारग्रैवेयकयज्ञोपवीतादिस्वरूपोरगाजगवनामकधनुर्द्वीपिकृत्तिकृष्णमृगभस्मानि भवतींश्रीगङ्गानामधेयांनदीरूपान्त्वामपि दधद्धारयत् अतएव सत्सर्वोत्तमतयाविराजत् वपुश्शरीरम् कलं अथकलेवरम् गात्रंवपुस्संहननंशरीरंवर्ष्मविग्रहः कायोदेहः क्लीवपुंसोस्स्त्रियांमूर्त्तिस्तनुस्तनूरित्यमरः देवैरिन्द्रादिभिः वन्द्यंनमस्करणीयंस्तुत्यंवा सत्

जननि तव पयोभि स्सङ्गतानाञ्जनानां शशिभुजगपिनाकव्याघ्रचर्म्मैणभूतीः । दधदपि भवती न्द्राक् सद्वपुर्देववन्द्य ङ्घ्रिमुनपदमनन्तंशैवमुद्यातिसद्यः ॥ ३२ ॥. पतितजनसमूहान्भस्मलेशावशेषान्सुरपतिसमभोगान्यत्करोति स्वस- ङ्गतः । तदपरिमितवीर्यश्चालितस्वर्गिधैर्यम्भगवति सलिलन्ते माम्पवित्रीकरोतु ॥ ३३ ॥

अनन्तंमहाप्रलयेप्यविनाशि शैवङ्कोटिब्रह्माण्डाधिपतिश्रीशङ्करसम्वन्धि तदधिष्ठितमचिन्त्यरूपलक्षणंवा पदंस्थानंवस्तुवा सद्यःप्राणोत्क्रमणावसरएव नोयातिकिमुनोद्गच्छति किमु किन्तूयात्येवेतिकाकुः अत्रदेववन्द्यमितिपदविशेषणंवेत्यनुसन्धेयम् अनेनश्रीगङ्गाजलसमागमादतीवदुर्लभोमोक्षोऽपियदिसुलभस्तर्हित्रिवर्गसम्पत्तेःकावार्त्तेतिसूचितम् उक्तञ्च गङ्गामधिकृत्यवाराहे ब्रह्महा गुरुहा गोघ्न स्स्पृष्टो वा सर्वपातकैः तस्यास्तोयैर्न्नरस्स्पृष्टस्सर्वपापैः प्रमुच्यते इति अथब्राह्मे सर्वाणियेषाङ्गाङ्गैस्तोयैःकृत्यानिदेहिनाम् देहन्त्यक्त्वानराश्शैवेपदेतिष्ठन्तिसर्वदेति अथमहाभारते यद्यकार्यशतङ्कृत्वाकृतङ्गङ्गाभिषेचनम् सर्वन्दहतिगङ्गाम्भस्तूलराशिमिवानलइति अथब्रह्माण्डे गङ्गायान्त्यजतःप्राणान् कथयामिवरानने कर्णेतत्परमम्ब्रह्मददामिमामकम्पदमिति ॥ ३२ ॥ अथश्रीभागीरथ्या [illegible] पतितेति हेभगवति लोकोत्तरवैभवशालिनि गङ्गे

यत् ते तव सलिलञ्जलम् कर्त्तृ भस्मलेशावशेषान् देहदाहानन्तरम्भस्मलवमात्रावशिष्टान् पतितजनसमूहान् कृतनानाविधपापव्रातानसङ्ख्याताञ्जनान् स्वसङ्गात्स्वकीय सम्पर्कमात्रादेव सुरपतिसमभोगानिन्द्रतुल्यसुखान् करोति विदधाति अपरिमितवीर्य्यंन्निस्सीमप्रभावम् चालितञ्च्यावितम् स्वर्गिणान्देवानाम् धैर्य्यमेतादृशजनसमुद्धारेधीरत्वंयेनतत्तथोक्तम् तत्तेसलिलम् मान्त्वदेकशरणम् पवित्रीकरोतु साञ्जिनसंसृतिकारणभूतदुरितराशिभ्योविमुक्तीकरोत्वित्यर्थः अनेनश्रीगङ्गाजलस्पृष्टनिजभस्मकणमहिम्नैव यदि दुष्कृतिनांमहेन्द्रपदलाभस्तद्भक्तिभावेनश्रीगङ्गांसेवमानानाङ्कावार्त्तेतिसूचितम् ॥ ३३ ॥ अथच पथिकादिसमानीतगङ्गाजलकणपानमहिमातिशयन्दर्शयन् श्रीगङ्गांस्तौति सकृदपीति हेअम्बजननिगङ्गे नन्ववधारणे वेधःप्रपञ्चेऽस्मिन् विधिसृष्टेविश्वस्मिन् कोऽपि जन्तुश्शरीरी कथमपि केनापिदैवघटितेनप्रकारेण ननु भवत्तीरमेवगत्वेत्यर्थः सकृदप्येकवारमपि तेतव श्रीमतोलोकोत्तरोत्कर्षशालिनः अम्भसःपानीयस्य कणोलेशः तम् कर्म स्वल्पमपिपानीयमित्यर्थः परिपीयसमुपभुज्य जातुकदाचिदपि कृताविहिताः बृहतांमहतांब्र-

सकृदपि परिपीय श्रीमदम्भःकणन्ते कथमपि ननु जन्तुः कोऽपिवेधःप्रपञ्चे । कृतबृहदघवारप्राण्यदुर्दर्शसम्पन्मिहि-
रजपुरवासी जातु किञ्जायतेऽम्ब ॥ ३४ ॥ जननिजननहारञ्जन्मवारे व्यतीते त्वदमलजलपानं नो मया ऽकारि
जाने । यदिह जनुषि मातुः कुक्षिवासोद्भवानां लसदसुखभराणाश्चर्वणं साध्वकार्यम् ॥ ३५ ॥

ह्महत्यादीनाम् अघानामेनसाम् वारास्समूहायैः तैःप्राणिभिर्जन्तुभिःसुकर्मलवेनाप्यपाकृतत्वान्मनुष्याभासैरित्यर्थः अदुर्दर्शाअकृच्छ्रेणद्रष्टुंयोग्याः निर्मुक्तकपाटन्दर्शनीयाइत्यर्थः सम्पदस्समृद्धयः असिपत्रकुम्भीपाकादिनानाविधनिरयरूपायस्यतत्तथोक्तम् यत् मिहिरजस्यदिवाकरसूनोःप्रेताधिपतेर्य्यमस्येतियावत् पुरंनगरम् तत्रवसति तच्छीलः तथा भूतोजायतेकिम्भवतिकिम् नेत्यर्थः काक्का अनेनादृष्टवशावाप्तश्रीगङ्गाजलकणसकृत्पानप्रभावाद्यमपुरदर्शनयोग्यतोच्छेदश्चेत्तद्बहुवारश्रीगङ्गाजलयथेष्टसमुपभोगवैभवतोनिरयाधिगमकारणवृजिनसमुच्छित्तिपूर्वकम् सद्गतिलाभस्यकाकथेतिसूचितम् ॥३४॥ अथ पूर्वजन्मपरम्पराऽनुमितश्रीगङ्गाजलपानाभावपश्चात्तापन्दर्शयन् श्रीगङ्गां स्तौति जननीति हेजननिमातर्गङ्गे व्यतीतेवर्त्तमानजनुषःप्राक्तनेजन्मनांवारे [illegible] जननञ्जन्म पुनःपुनस्समुत्पत्तिम् हरतीतितत्तथोक्तम

भवीयोत्पत्तिभञ्जनमित्यर्थः कर्मण्यण् तव अमलस्यदोषमलरहितस्य स्वच्छस्येतिवा जलस्यपयसः पानम् मया नो अकारि नविहितम् भवदीयजन्मसहकारिदुःखभयहारिवारि नपीतामितिभावः इत्यहम् जानेतर्कयामि यद्यस्माद्धेतोः इहास्मिञ्जनुषि जन्मनि जनुर्जननजन्मानि जनिरुत्पत्तिरुद्भवइत्यमरः मातुर्जनन्याः जनयित्रीप्रसूर्म्माताजननीत्यमरः कुक्षिवासोद्भवानाञ्जठरनिवासहेतुकानाम् पिचण्डकुक्षीजटरोदरन्तुन्दमित्यमरः लसन्तस्स्वकीयप्रौढिप्रभावेणातीवस्फुरन्तो येऽसुखभरानानाप्रकारकदुःखातिशयाः तेषाम् साधुसम्पक् न तु न्यूनतया चर्वणम्पूर्णास्वादम् समनुभवमितियावत् अहम् अकार्षङ्कृतवानस्मि अनेन श्रीगङ्गाजलपायिनांनकथमपिभाविसांसारिकदुःखानुभवःसम्भवतीतिसूचितम् ॥ ३५ ॥ अथ तत्त्रिलोकीपतिमहेश्वरशिरोधारणगौरवम्प्रकाशयन् स्वोद्धाराङ्गीकारायश्रीगङ्गाम्प्रार्थयते भुवनेति हेअम्ब त्रिभुवनजननि गङ्गे किलेत्यैतिह्ये वाक्यालङ्कारे ऽवधारणे वा राजसाद्यैः राजससात्विकतामसैः त्रिभिस्त्रिसङ्ख्याकैः रूपैर्ब्रह्माविष्णुरुद्राभिधेयैराकारैः रूपंश्लोकशब्दयोः पशावाकारे सौन्दर्ये ना लोके नाटकादिके

भुवनजननरक्षासंहृतीराजसाद्यैस्त्रिभिरपि किल रूपैः कर्त्तुमीशोऽप्यनीशः ।
महदिह मनुते यं वैभवं स्वङ्गिरीश स्स भवतु सलिलौघ स्तेऽम्ब मत्सत्कृतीशः ॥ ३६ ॥

इतिहेमचन्द्रः भुवनानांलोकानाम् जननरक्षासंहृती रुत्पत्तिपालनप्रलयान् कर्त्तुंविधातुम् ईशोऽपि समर्थोऽपि अनीशोऽसमर्थइतिविरोधः नास्तिनविद्यते ईशः प्रभुर्नियन्ताऽन्यःकश्चिदपियस्यसइतिविरोधपरिहारः गिरीशःश्रीशङ्करः यम् तेतव सलिलौघञ्जलप्रवाहम् ओघःप्रवाहस्सङ्घातोद्रुतनृत्तम्परम्परा उपदेशश्चेतिहेमचन्द्रः महल्लोकोत्तरमहिम पूजनीयं वा स्वमात्मीयम् स्वःस्यात्पुंस्यात्मनि ज्ञातौत्रिष्वात्मीये धनेऽस्त्रियामितिमेदिनी विभवएववैभव मैश्वर्यंसर्वस्वमितियावत् स्वार्थेण् विभवारैमोक्षैश्वर्यैइतिमेदिनी इहास्मिन्निखिलेऽपिब्रह्माण्डे मनुतेजानाति अन्यथाकथंमूर्द्धप्रदेशेऽविरतंसादरातिशयम् धारयतीतिभावः सतेतव सलिलौघः मत्सत्कृतौसकलदुरितपरिहारपूर्वकसमुद्धरण कृते मदङ्गीकारस्वरूपेमत्सत्कारे ईशःप्रभुस्समर्थः भवतुजायताम् अयमतीवपापीयान्समुपेक्षणीयएवेतिमदुपेक्षाम् नकरोत्वितिभावः अनेन यस्यास्तवप्रवाहंश्रीमहेश्वरः सर्वे-

स्वबुद्ध्यामस्तकप्रदेशेदधाति तस्यास्तवमहिमान्तङ्कोवतेदितिसूचितम् ॥ ३६ ॥ अथसकलविवेकिमहानुभावजनसमाश्रयणीयत्वपर्यालोचनयास्वकीयसंसृतिमहार्त्तिविच्छेद स्मार्थयन् श्रीगङ्गांस्तौति हेद्युतटिनि स्वस्सरित् श्रीगङ्गेत्रिभुवनवसतीनांलोकत्रयवासिनाम् धर्मकर्मोन्मतीनाम्पुण्यकार्योत्सुकबुद्धीनाम् निजवर्णाश्रमानुकूलधर्मोन्मुखधियांवा कृतास्सम्पादिताः सतान्दुष्कृतपराङ्मुखानांमहात्मनाम् उपकृतयउपकारायैस्तेषाम् परार्थैकफलजन्मनामित्यर्थः यद्वा कृताः सत्यःप्रत्युपकाराभिलापराहित्येनोत्तमाः उपकृत योयैस्तेषाम् त्वयि रतीरागः निर्दम्भोभक्तिभावइत्यर्थः येषान्तेषाम् रतिःस्त्रीस्मरदारेष्वनुरागेसुरतगुह्ययोरितिमेदिनी यतीनांमोक्षावाप्तिसाधनसम्पत्तितत्पराणांमुमुक्षूणाम् ये निर्जितेन्द्रियग्रामायतिनोयमयश्चतेइत्यमरः अमितजननजातमसङ्ख्यातजन्मार्जितम् मूर्त्तिमन्मूर्त्तम् सविग्रहमितियावत् पुण्यन्धर्मः शास्त्रसम्मतस्ववर्णाश्रमानुकूलकर्म विशेषइत्यर्थः स्याद्धर्मम स्त्रियाम्पुण्यश्रेयसीसुकृतम्वृषइत्यमरः तत्स्वरूपम् तव नीरम्पानीयम् कर्त्तृ मम त्वदेकपरायणस्यसुकृतलवपराङ्मुखस्यदुरितैकसक्त मानसस्या-

त्रिभुवनवसतीना न्धर्म्मकर्म्मोन्मतीना ङ्कृतसदुपकृतीना न्त्वद्रतीनां यतीनाम् । अमितजननजातं मूर्त्तिमत्पुण्यमस्तु द्युतटिनि तव नीर म्मद्भवध्वंसधीरम् ॥ ३७ त्रिभुवनपतिरीशो न्यस्य भाले सुधांशुं निजशिरसि दधार त्वज्जल-ङ्गौरवाद्यत् । सवृजिनहृतिशक्ति प्रोच्यते तत्सुधीभि स्सुमहदपि सुधातो देवि सौन्दर्य्यमस्य ॥ ३८ ॥

ऽस्य भवध्वंसेजन्ममरणादिनानोत्कटदुःखास्पदसंसारनिवर्त्तने धीरन्धैर्य्यवत् धृतोत्साहमित्यर्थः अस्तुभवतु मांमुक्तसंसारबन्धनंविदधात्वितियावत् अनेनश्रीगङ्गाजलस्य सकलमुमुक्षुजनमानसासक्त्यतिशयास्पदत्वेनानायासमोक्षावाप्तिसाधनत्वन्ध्वनितम् ॥ ३७ ॥ अथचामृतादपिश्रीगङ्गाजलस्यसमुत्कर्षतान्दर्शयन् श्रीगङ्गांस्तोतुमारभते त्रिभु-वनपतिरिति हेदेविदेवस्वरूपेश्रीगङ्गे यद्यस्माद्धेतोः त्रिभुवनपतिस्त्रिलोक्यधीशोऽपि ईशः श्रीमहादेवः ईशःप्रभौमहादेवे इति मेदिनी भालेस्वकीयेललाटे सुधांशुममृतरश्मिश्च-न्द्रमसमित्यर्थः न्यस्यक्षिप्त्वा नतुधृत्वा इत्यतीवानादरावसायिपदप्रयोगः निजशिरसिसमुपदर्शितसुधांशुप्रक्षेपस्थानभालादत्यन्तोच्चैःस्वकीयमूर्द्धप्रदेशे त्वज्जलन्त्वदीयमम्भः गौरवात्सत्कारबाहुल्यात् दधारधृतवान् तत्तस्माद्धेतोः सुधीभिर्विचारशालिबुद्धिभिः अनुमानप्रधानैस्तार्किकैरितिभावः अस्यश्रीमहादेनानिजशिरोदेशेसादरन्धृतस्यत्वज्जलस्य ॥११॥

सुधातोऽमृतादपि सुमहदतिबहुलम् शोभनंवृहच्चावा यतश्चवृजिनानाम्ब्रह्महत्यादिमहापापानाम् ह्रतौहरणे ह्रतयेहरणायवा याशक्तिस्सामर्थ्यम् तयासहवर्त्ततेतत्तथोक्तम् सौन्दर्य्यंसुभगत्वम् सर्वोत्कर्षशोभाशालित्वंवा प्रोच्यतेप्रकर्षेणकथ्यते निश्शङ्कतयानिरूप्यतेइत्यर्थः अनेनसर्वथैवसर्वदैवमोक्षाकाङ्क्षिभिर्ज्जनैरमृतात्यन्तानास्थापूर्वकमेवश्रीगङ्गाजलं सेवनीयमितिध्वनितम् ॥३८॥ अथचास्यश्रीगङ्गाजलस्याखिलवेदसारसर्वस्वत्वंवर्णयन् श्रीगङ्गांस्तौति जलजेति हेदेवि देवसदृशंसर्वजनोपास्येभागीरथि नु वितर्केऽनुनये वा शुद्धिमद्भ्यो मिथ्यावादादिदोषविरहितत्वादतीवपावनेभ्यः चतुर्भ्यश्चतुस्सङ्ख्याकेभ्यः जलजजनिमुखेभ्यः श्रीमद्ब्रह्मदेववदनेभ्यः पूर्वादिक्रमेण यथासङ्ख्यम् समधिगत जनुर्भिं स्सम्यग्लब्धजन्मभिः उत्पन्नैराविर्भूतैरितियावत् चतुर्भिर्ऋगादिभिर्वेदैराम्नायैः यत्तवेदम्मदीयदृग्गोचरीभुतम् अम्भो जलम् स्वमात्मीयम् सर्वस्वं सारस्वरूपम् सर्वाधिकतया एतन्माहात्म्यवर्णनादितिभावः अमानि मतम् उक्तश्चपण्डितराजैः श्रुतीनांसर्वस्वमिति तत्तवेदमम्भः मम त्वदेकधृतनिजनिखिलभारस्य एनः पापमेवकर्दमः

जलजजनिमुखेभ्य श्शुद्धिमद्भ्य श्चतुर्भ्य स्समधिगतजनुर्भिं र्देवि वेदैश्चतुर्भिः। तव यदिदममानि स्वं नु सर्वस्वमम्भ स्स्फुरतु मम तदेनःकर्दमक्षालनाय ॥ ३९ ॥ समभिलषति गङ्गे त्वामुपैतुं सकृद्य स्समभिलषति शक्रः प्रोद्धृतिन्तात्पितॄणाम् । विहित महह येन स्नानमम्बत्वदीये पयसि हरि दुरापं नैति किं सत्पदं सः ॥ ४० ॥

पङ्कः निषद्वरस्तुजम्बालः पङ्कोऽस्त्रीशादकर्दमावित्यमरः तस्य क्षालनायमार्ज्जनाय स्फुरतुस्फुरणम्प्राप्नोतु बद्धपरिकरोभवत्वित्यर्थः क्रियार्थोपपदस्येतिचतुर्थी अनेनश्रीगङ्गाजलमाहात्म्यस्यनिखिलवेदप्रतिपाद्यत्वंसूचितम् ॥ ३९ ॥ अथश्रीगङ्गेप्साम्नानफलतारतम्यवर्णनकपटेनश्रीगङ्गांस्तौति समभीति हेगङ्गेमातः यःकोऽपिजनः सकृदेकवारमपि सर्वदैवेप्सोस्तुकावार्त्तेतिभावः त्वाम्भोगमोक्षैकप्रदात्रीम्भवतीम् उपैतुम्प्राप्तुम् त्वदन्तिकङ्गन्तुमित्यर्थः समभिलषति वाञ्छति ममापि श्रीगङ्गादर्शनम्भवेदितिमनोरथङ्कुरुतेइतिभावः तस्यपितरः पूर्वपुरुषाः तेषामपि तस्यतुकाकथेतिभावः प्रोद्धृतिम् प्रकर्षेण यथापुनर्दुर्गतिङ्कथमपिनाप्नुवन्तुतथेत्यर्थः उद्धृतिम् स्वकीयदुष्कर्म्मभराधिगतातिदुस्सहनिरयदुःखेभ्यउद्धारम् शक्रस्त्रिलोकीश्वरो महेन्द्रः समभिलषति अवश्यकर्तव्यतयावाञ्छति अथच हेअम्ब जगज्जननि अहहेत्यद्भुते येनकेनापिप्राणिना त्वदीयेत्वत्स-

स्वान्धिनि पयसिजले प्रवाहमध्यवर्त्तिनीतिभावः स्नानमवगाहनम् विहितङ्कृतम् सः प्राणी हरिणेन्द्रेण यमानिलेन्द्रचन्द्रार्कविष्णुसिंहांशुवाजिषु शुकाहिकपिभेकेषुहरिर्नाकपि लेत्रिष्वित्यमरः दुरापन्दुष्प्रापम् तदधिष्ठातृदेवतादर्शनादिविना तत्प्राप्त्यनुकूलपुण्यैर्विनावादुर्लभमित्यर्थः अतएव सत् सर्वोत्तमतयासमुत्कर्षशालि विनाशरहितंवा पदं स्थानंवस्तुवा नैतिनप्राप्नोतिकिम् किन्त्वेत्येवेतिभावः अनेनश्रीभागीरथीस्नुजनपूर्वपुरुषाणामनायासमेवदुर्गतिपरिहारपूर्वकंस्वर्गाधिगमः कृतश्रीगङ्गास्नानस्यजनस्यत्विन्द्रादि दुर्लभाक्षयपदलाभइतिसूचितम् ॥ ४० ॥ अथात्यन्तवराकजनानामपि श्रीगङ्गास्नानप्रभाववशादिन्द्रादि कृतबहुलसत्कारपुरस्सरन्त्रिदशालयावाप्तिंवर्णयन् श्रीगङ्गांस्तौति तवेति हेअम्बमातृवत्सदैवसदयहृष्टेश्रीगङ्गे दरिद्राअपिसर्वजनानादरास्पदीभूतानिर्द्धनाअपियेजनाः अहोआश्चर्यं कथञ्चित्केनापियोगेन सकृदेकवारमपि वरभाग्यैस्तर्काविषयै श्शुभदैवैःदैवन्दिष्टम्भागधेयम्भाग्यंस्त्रीनियतिर्विधिरित्यमरः तवपयसिप्रवाहसलिले स्नानम् कुर्वतेविदधति तेदरिद्राजनाः कम्रसत्कारनम्रैरकृत्रिमतया मनोह्लादरजनितनम्रताऽ

तवपयसिदरिद्राअप्यहोयेकथञ्चित्सकृदपिवरभाग्यैःकुर्वतेस्नानमम्ब । अमरपरिवृढाद्यैः कम्रसत्कारनम्रैर्धृतवरशिबि
कान्ता स्तेनकिं स्वर्विशन्ति ॥ ४१ ॥ विबुधसरिदिदानीम्मद्वचस्संश्रृणुत्वन्त्वदमलजलयोगःकेवलम्पार्थिवंनो ।
मलमपनयतिद्रागप्यविद्याभिधानंवदकिमधिकमस्मादस्तिपूतञ्जगत्सु ॥ ४२ ॥

वलस्विभिः कान्तञ्चकमनङ्कम्रङ्कमनीयंमनोहरम् अभिरामंरमणीयंरम्यंसौम्यञ्चसुन्दरम् चारुश्लक्ष्णञ्चरुचिरंशस्तंहृद्यञ्चबन्धुरम् दर्शनीयंमनोज्ञञ्चचित्तपर्य्यायहारिचेतिधनञ्जयः अमरपरिवृढाद्यैस्सुरराजप्रमुखैर्देवैः आद्येनयमवरुणकुवेरादीनाङ्ग्रहणम् धृतास्स्कन्धप्रदेशेस्थापिताः वरायास्स्वर्णमणिमौक्तिकादिमयत्वादत्यन्तसुभगायाः शिबिकायायाप्ययया नापर नामधेयस्यमनुष्यवाह्यस्यचतुरस्रस्ययानविशेषस्य शिबिकायाप्ययानंस्यादित्यमरः अन्तउभयतस्स्थूलतरदण्डविशेषप्रान्तप्रदेशा येषान्तेतथोक्तास्सन्तः स्वरूपेऽन्तंमत- ङ्क्लीवंनस्त्रीप्रान्तेऽन्तिकेत्रिष्वितिविश्वलोचनम् स्वस्स्वर्गम् नविशन्तिकिम् अपितुविशन्त्येवेत्यर्थः अनेन तथाभूतानान्दरिद्राणामपि स्थितिरियंयदि तर्हिबहुलतरधनव्यय ॥१२॥
पूर्वकंसश्रद्धोत्साहास्सन्तोयेश्रीगङ्गास्नानंविदधति [illegible] ॥ ४१ ॥ [illegible]जलोपभोगस्संसारबन्धननिदानाविद्यानिवारक

इतिवर्णयन् श्रीगङ्गांस्तौति विबुधेति हेविबुधसरिदमरनदिश्रीगङ्गे इदानींसम्प्रति मद्वचोवक्ष्यमाणंममवचनम् त्वम् संश्रृणुसमाकर्णय किमितिचेदित्याह त्वदमलजलयागो नानाम्बुदोषमलरहितत्वदीयपानीयसंस्पर्शः केवलमेकम् पार्थिवम्भौमम् मलंमालिन्यहेतुङ्किट्टंनापनयति नदूरीकरोति मलोऽस्त्रिपापविट्किट्टेष्कृपणेत्वभिधेयवदितिमेदिनी अपितु अविद्याभिधानंसंसारकारणाज्ञाननामकमपिमलम् अथाज्ञानमविद्याहम्मतिस्स्त्रियामित्यमरः द्राग्झटिति स्पर्शसमकालमेवेत्यर्थः अपनयातिनिवर्त्तयाति अन्यथा कथंमोक्ष पात्रतेतिभावः अतः जगत्सुत्रिषुलोकेषु अस्मात्त्वदमलजलयोगात् वुद्धिस्थितात्त्वज्जलाद्वा अधिकम् पूतम्पवित्रम्पवित्रताजनकमितियावत् किमस्तीतित्वंवदकथय नकिमप्य-स्तीतितात्पर्य्यार्थः अनेनश्रीगङ्गाजलस्पर्शस्यज्ञानसाधनतासूचिता तथाच देवीभागवतेनवमेस्कन्धेद्वादशेऽध्याये यत्तोयकणिकास्पर्शंपापिनाञ्ज्ञानसम्भवः ब्रह्महत्यादिकम्पाप ङ्कोटिजन्मार्ज्जितन्दहेदिति ॥ ४२ ॥ अथच स्वमनश्शान्तिम्प्रार्थयन् श्रीगङ्गांस्तौति तरुणेति हेजननिद्वन्द्वतदुःखपरम्परानिवेदनयोग्यतास्पदीभूतेमातर्गङ्गे तरुणतरोऽतिप्रौढः

तरुणतरदवोद्यत्कीलजालोरुलीलाविजयकुशलकामक्रोधसन्तापतप्तम् ।

जननितवतरङ्गप्रोच्छलन्नृत्यभङ्गीभृदमलजलविन्दोर्मेमनश्शान्तिमेतु॥ ४३ ॥

योदवोवनाग्निः दवदावौवनारण्यवह्नीइत्यमरः तस्य उद्यन्तःप्रवलतराये कीलाज्वालाः वह्नेर्द्वयोर्ज्वालकीलावर्चिर्हेतिश्शिखास्त्रियामित्यमरः तेषांयानि जालानिवृन्दानि जालङ्गवाक्षआनायेक्षारकेदम्भवृन्दयोरितिमेदिनी तेषाम् उरुलीलास्सर्वतोदिक्प्रसरणलक्षणाः पृथुलविलासाः विशङ्कटम्पृथुवृहद्विशालम्पृथुलंमहत् वड्रोरुविपुलमित्यमरः तासाम् विजयेस्वप्रौढतयातदधस्तात्करणस्वरूपेपराजये कुशलौचतुरौ समर्थावित्यर्थः यौकामक्रोधौ ताभ्यांनिमित्तभूताभ्याम् यस्सन्तापस्सञ्ज्वरोमनःपीडाविशेषइत्यर्थः सन्तापस्सञ्ज्वरस्समावित्यमरः तेन सन्तप्तमतीवसञ्जातव्यथम् मेमम मनश्चित्तम् कर्त्तृ तवत्वत्सम्वन्धिनान्तरङ्गाणांवीचीनाम् प्रोच्छलतउद्गच्छतः अतएव नृत्यभङ्गीभृतो नर्त्तनप्रकारविशेषजुषः अमलस्यस्वच्छस्य जलस्याम्भसः विन्दुःपृषत् तस्मादेकस्मादेव यथासम्भवम् दृष्टात् स्पृष्टात्पीताद्वेतिशेषः शान्तिन्निखिलक्लेशप्रहाणकारणीभूतंस्वरू-पावस्थितिस्वरूपविशेषंशमम् एतुप्राप्नोतु कामक्रोधादिविकारशून्यतया निश्चलम्भवत्वित्यर्थः अनेनश्रीगङ्गाजलविन्दोरत्यन्तदुस्साध्यमनोविशुद्धिहेतुत्वन्ध्वनितम् ॥ ४३ ॥

गं. श

॥१३॥ अथश्रीकपिलमुनिकोपाग्निदग्धसगरसूनुसमुद्धारकथनव्याजेनश्रीगङ्गायामाहात्म्यातिशयन्दर्शयन् तांस्तौति कपिलेति हेअम्बमातृवत्सर्वदैवशुभकारिणि श्रीगङ्गे कपिलस्य
विष्ण्ववतारविशेषस्यैतन्नामकस्यमुनेः दृगुत्थोदृष्टिपातसमुत्पन्नोयः क्रोधवैश्वानरोनिर्विकल्पकसमाधिविक्षेपजनितः कोपानलः तस्य उग्राअत्यन्तभीषणाः स्फुरन्तोविष्वग्दे
दीप्यमानाः अपरिमिताअसङ्ख्याताःमितिरहितावा उद्यन्तऊर्द्ध्वञ्ज्वलन्तः येज्वालाश्शिखाः तैर्भस्मीकृतानितत्क्षणमेवदग्ध्वाभसितमात्रावशिष्टीकृतानि अङ्गानिशरीराणिसर्व
एवशरीरावयवावायेषान्तेतथोक्तास्तैः तेवहुतरप्रयासैर्नृपतिवरभगीरथसमानीतायास्तव सलिललवमहिम्नाजलकणस्पर्शप्रभावेन लब्धामरत्वैरवाप्तदिव्यशरीरैः सगरस्यै
तन्नामकस्य पुराणेतिहाससमुद्घुष्टप्रतापातिशयस्यसार्वभौमस्यराजविशेषस्य तनूजैःषष्टिसहस्रसङ्ख्याकैरात्मजैः दिविस्वर्गलोके भक्त्यास्वोद्धारजनितेनानुरागविशेषेण
त्वम् नगीयसेनानाविधस्तोत्रप्रवन्धैः नस्तूयसेकिम् अपितुसानुरागङ्गीतगुणाभवसीतिभावः अनेन भस्मसम्पर्कमात्रादेवसगरसूनुसमुद्धारदर्शनात् श्रीगङ्गाजलस्याचिन्तनीय

कपिलमुनिदृगुत्थक्रोधवैश्वानरोग्रस्फुरदपरिमितोद्यज्ज्वालभस्मीकृताङ्गैः । सलिललवमहिम्नातेऽम्बलब्धामरत्वैर्दिवि
सगरतनूजैर्गीयसेकिन्नभक्त्या ॥ ४४ ॥ सुरसरिदिहलोकेभाग्यहीनोमनुष्यस्सकृदपिसलिलेतेस्नातुकामोऽपिनोयः ।
दुरितनिचयउच्चैस्सादरन्त्यक्तशङ्कम्भगवतिवदतेनप्राग्भवेकोव्यधायि ॥ ४५ ॥

माहात्म्यशालित्वन्ध्वनितम् ॥४४॥ अथचाकृतगङ्गास्नानमनुष्यनिन्दाव्याजेन श्रीगङ्गांस्तौति सुरसरिदिहेति हेसुरसरिदमरनदिश्रीगङ्गे इहास्मिँल्लोकेमर्त्यलोके भाग्यैश्शुभदैवैः
हीनोऽत्यन्तविरहितः दुर्दैवमन्दीकृतबुद्धिरित्यर्थः योमनुष्योमानवव्यक्तिमात्रधारी असफलीकृतमानवत्वइत्यर्थः सकृदप्येकवारमपि तेतव सलिलेप्रवाहात्मकेजले स्नातुकामो
निमज्जनेप्सुरपिनो अस्तीतिशेषः तेनमनुष्येण प्राग्भवेपूर्वस्मिञ्जन्मनि भवस्सत्ताप्तिजन्मसु रुद्रेश्रेयसिसंसारे इतिहेमचन्द्रः सादरंससत्कारम् सचित्तासक्तीतियावत् यथा ॥१३॥
स्यात्तथा त्यक्तशङ्कम्परिहृतलोकशास्त्रातङ्कलेशश्च निर्लज्जश्चेतियावत् [illegible] प्राप्तेभ्यस्समुन्नतोमहान्वा दुरितानाम्पापानाम् निचय
स्समूहः कःकिंस्वरूपः व्यधायि विहितःसम्पादितः हेभगवति इति त्वम् वदब्रूहि अन्यथा कथमेतादृशीमतिरितिभावः अनेन येषाम् श्रीगङ्गास्नानकृते सङ्कल्पोऽपिनोदेति

तेऽत्यन्तमन्दभाग्यानिष्फलजन्मानइतिसूचितम् येगच्छन्तिस्वतोगङ्गाम्परांश्चप्रेरयन्तिये इहतेसर्वभोगानामन्तेज्ञानस्यभाजनासिति ब्रह्माण्डे श्रीगङ्गास्नानार्थम्परप्रेरणाया अपि माहात्म्यस्यदर्शनात् ॥ ४५ ॥ अथसर्वदैवश्रीगङ्गायांस्नानप्रभावाधिगतपुण्यातिशयेनावाप्तपञ्चत्वस्यदेहिनस्सर्वोत्तमानन्तभाग्यशालित्वंवर्णयंस्तांस्तौति प्रतीति हेजननि पुनत्व साधारणतयासर्वजनलालनाज्जगन्मातः श्रीगङ्गे यःकोपिप्राणी इहास्मिन्पुरोवर्त्तिनिदृश्यमाने इत्यङ्गुलीनिर्देशः तावकीने भवत्प्रवाहसम्बन्धिनि तोयेसलिले प्रतिदिनम्प्रत्यहम् एककालन्द्विकालंवात्रिकालंवेतियथासम्भवमितिभावः निमज्जन्स्नानम् कुर्वन् अतएव परिचितानाञ्जन्मजन्मान्तरसञ्चितानाम् सानुरागंविधानाल्लब्धसख्यानांवा दुरितानाम्बहुविधानाम्पापानाम् ओघान्समूहान्प्रवाहान्वा आशुस्नानसमयएव दूरतोऽतिदूरम् मुञ्चंस्त्यजंश्चसन् अथच निरयगपितृपूगांस्तपनाचीचिमहारौरवकुम्भीपाकादिनरकस्थपूर्वपुरुषवृन्दानि स्यान्नारकस्तुनरकोनिरयोदुर्गतिस्स्त्रियामित्यमरः पूगस्तुक्रमुकेवृन्दे फलसारेऽभिधेयवदितिमेदिनी स्वस्स्वर्गङ्गतास्स्वर्गताः तान् द्वितीयाश्रितातीतेतिसमासः

प्रतिदिनमिहतोयेतावकीनेनिमज्जन्परिचितदुरितौघान्दूरतश्चाशुमुञ्चन् । निरयगपितृपूगान्स्वर्गतांश्चापिकुर्वंस्त्यजति

जननियोऽसूंस्तस्यभाग्यंवदेत्कः ॥ ४६ ॥ सुरसरिदुपविश्यत्वत्तटेपुण्यलब्धैर्विदधतितवतोयैस्तर्प्पणंयेपितॄणाम् ।

पितरउततदीयाःक्षीणपापादुरापान्हरिहरविधिलोकान्सत्कृताःकिंनयान्ति ॥ ४७ ॥

स्वर्गनिवासिनोऽपिचकुर्वन् असून्प्राणांस्त्यजति पञ्चत्वमवलम्बते तस्यप्राणिनः भाग्यंशुभदैवम् कोवदेत् वक्तुङ्कश्शक्नुयान्नकोऽपीत्यर्थः यद्वा अहोभाग्यमस्येति तस्यभाग्यम् कः साक्षाद्ब्रह्मदेवः वदेदवश्यमेवकथयेदितिसम्भावनायांलिङ् कोब्रह्मणिसमीरात्मयमदक्षेषुभास्करे कामग्रन्थौचक्रिणिचपतत्रिपार्थिवेतथा मयूरेऽग्नौचपुंसिस्यान्मुखशीर्ष जलेषुकमितिमेदिनी अनेनप्रतिवासरङ्कृतगङ्गास्नानस्यान्तेनिखिलस्वपितृसमुद्धारपूर्वकम् प्राप्तसद्गतेर्लोकोत्तरभाग्यभृत्त्वंसूचितम् ॥ ४६ ॥ अथचश्रीगङ्गाजलतर्प्पणमाहात्म्यं वर्णयन् श्रीगङ्गांस्तौति सुरेति हेसुरसरिद्देवधुनिश्रीगङ्गे येजनाः त्वत्तटेत्वत्तीरे उपविश्यकुशासनाद्युपरिस्थित्वा पुण्यलब्धैः पूर्वार्ज्जितसुकृतराश्यवाप्तैः तव तोयैःपयोभिः पितॄणांनिजपूर्वपुरुषाणाम् तर्प्पणम् अमुकगोत्रोऽमुकशर्मापितातृप्यतामिदञ्जलंसतिलन्तस्मैस्वधेतितृप्तिम् विदधतिकुर्वन्ति उतवितर्के तदीयास्तस्यतर्प्पणकर्त्तुर्जनस्यसम्ब-

न्धिनः पितरः पितृपितामहप्रपितामहाद्याः पूर्वपुरुषाः क्षीणपापाविगलिताखिलदुष्कृतास्सन्तः अथचसत्कृतास्तत्तल्लोकाधिपतिभिरादृतास्सन्तः सुरापानपुण्यजनदुष्प्रापान् हरिहरविधिलोकान् विष्णुशिवविरञ्चिलोकान् वैकुण्ठकैलासब्रह्मलोकसमाख्यान् नयान्तिनप्राप्नुवान्तिकिम् अपितुयान्त्येवेतिभावः अनेनस्वपितृसमुद्धारार्थमत्यन्तदुर्लभभाग्य वशलब्धश्रीगङ्गाजलतर्प्पणमितरकार्यसहस्रमपि अपहायविवेकिनोऽवश्यमेव प्रत्यहङ्कुर्वन्त्विवतिध्वनितम् ॥ ४७ ॥ अथश्रीगङ्गाजलपाचितान्नब्राह्मणभोजनमाहात्म्यन्दर्शयन् श्रीगङ्गांस्तौति अमृतेतित हेदेविश्रीगङ्गे येजनाः अमृतस्यसर्वदेवैकजीवातोस्सुधायाः विजयिभिस्स्वकीयमहत्त्वस्वादुत्वादिगुणगणमाहिम्ना विजयकारिभिः अमृतादप्यत्यन्तोत्त मैरित्यर्थः यतःपावनैःपवित्रैर्निजसेविपावित्र्यताजनकैः तेतव तोयैर्जलैः संस्कृतंविधिपूर्वकम्पाचितम् अतएवातिरुचिरम् स्वरूपस्वादुत्वाभ्यामतीवरमणीयम् अन्नमदनीयम्भक्ष- णीयम् अपूपादिकम् प्रमोदात्प्रीतिपूर्वकमित्यर्थः मुत्प्रीतिःप्रमदोहर्षःप्रमोदामोदसम्मदाइत्यमरः भोजयित्वाभोजनङ्कारयित्वा लेह्यादीनामुपलक्षणमेतत् क्षितिविबुधवरान्

अमृतविजयिभिस्तेपावनैर्देवितोयैरतिरुचिरमिहान्नंसंस्कृतम्भोजयित्वा । क्षितिविबुधवरान्येतर्प्पयन्तिप्रमोदादुभय
कुलपितॄंस्तेस्वर्न्नकिम्प्रापयन्ति ॥ ४८ ॥ त्रिदिवधुनिमुनीनाम्मानसाह्लादसम्पज्जननपटुतरन्तेतीरमासाद्यमर्त्यः ।
दुरिततहरणदक्षंयावदम्भस्तवैतात्पिबातिनाकिमुतावन्मुक्तिपात्रत्वमेति ॥ ४९ ॥

स्वकर्मनिरतत्वादुत्तमान्ब्राह्मणान् तर्प्पयन्तितृप्तान् कुर्वन्ति अतीवतुष्टाञ्जनयन्तीतियावत् तेजनाउभयकुलपितॄन्मातृपितृवंशीयपूर्वपुरुषान् स्वस्स्वर्गम् नप्रापयन्तिकिम् अपितु प्रापयन्त्येवेतिभावः अनेन यत्पाचितान्नब्राह्मणभोजनाद्दातृवंशद्वयपितृसमुद्धारः तस्यश्रीगङ्गाजलस्यमाहात्म्यातिशयवर्णनेकस्समर्थइतिसूचितम् ॥ ४८ ॥ अथश्रीगङ्गाजल पानाभिलाषाभिसन्धिमात्रान्मुक्तिपात्रतांवर्णयन् श्रीगङ्गांस्तौतित्रिदिवधुनीति हेत्रिदिवधुनिनाकनदिश्रीगङ्गे मर्त्योमरणधर्म्मामनुष्यः मुनीनांवेदशास्त्रार्थतत्त्वमननतत्पराणा ञ्जनानाम् मानसाह्लादसम्पदश्चित्तप्रमोदसमृद्धेः जननेसमुत्पादने पटुतरमतिचतुरम् समर्थमित्यर्थः दर्शनमात्राल्लोकोत्तरानन्दजनकमितिभावः तेतव तीरन्तटम् आसाद्यप्राप्य दुरितहरणदक्षम्ब्रह्महत्यादिमहापापानांसमूलमुन्मूलनकुशलम् पतन्मदूदृष्टिगोचरम् अम्भःपानीयम् यावद्यावत्कालपर्य्यन्तम् पिबतिपास्पति यावत्पुरानिपातयोर्लडितिभ- ॥१४॥

विष्यदर्थेलट् तावत् तावत्कालपर्य्यन्तमित्यर्थः जलपानस्याभिलाषसद्भावेसत्यपि तदर्वागेवेतिभावः मुक्तिपात्रत्वङ्कैवल्यभाजनताम् नैतिनप्राप्नोतिकिमु पत्येवेत्यर्थः अनेन श्रीगङ्गाजलस्यदर्शनेनापियदि मुक्तियोग्यतालाभः तर्हितदवगाहनादिनासइतिकिमुवक्तव्यमितिध्वनितम् ॥ ४९ ॥ अथश्रीगङ्गाजलेप्राणोत्क्रमणमाहात्म्यमाख्यापयन् श्रीगङ्गां स्तौति तवेति हेदेविदीपनशीलेश्रीगङ्गे पुण्यजन्माऽतिपवित्रोद्भवोधर्मार्थोद्भवोवा धर्महेतुकोत्पत्तिर्वा अतएव अतिधन्योऽतीवप्रशंसनीयः स्मृतस्स्मरणविषयीकृतः एकोऽद्वितीयस्सर्वेषुदेवेषुपूजनीयोवा मुख्योवा एकेमुख्यान्यकेवलाइत्यमरः उरुभिर्बहुभिस्त्रिभुवनान्तवर्त्तिभिर्भक्तैरित्यर्थः गीयतेइत्युरुगायः श्रीविष्णुः श्रीमहेश्वरोवा स्वोपास्यदेवइति यावत् येन सतथोक्तः योमनुष्यः तवत्वत्सम्बन्धिनि पवित्रेपावने दुरितनिवारकेइतिभावः चित्राण्यद्भुतानि चञ्चन्तिदेदीप्यमानानि चरित्राणिदुरुद्धरपापिसमुद्धारलक्षणानि वृत्तानिकर्माणिवायस्यतस्मिंस्तथोक्ते यद्वैतत्सम्बुद्धिपदम् पयसिप्रवाहजले यत्रकुत्रास्थितेवाजले निहितस्स्थापितः चरमोऽन्तिमः कस्त्वधस्ताद्वर्त्ती कायोदेहोयेनयस्यवा सत

तवपयसिपवित्रेचित्रचञ्चच्चरित्रेनिहितचरमकायस्संस्मृतैकोरुगायः । व्यसुरहहभवेद्यःपुण्यजन्मातिधन्यस्सकिमुन भवतिद्राग्देविमुक्ताग्रगण्यः ॥५०॥ भगवतिनयनाभ्यान्निष्फलाभ्यांङ्घ्रिमाभ्याहरिचरणनिसृष्टन्तेऽम्बुयाभ्यान्नदृष्टम् । श्रुतिभिरपिकिमाभिर्नश्रुतन्देवियाभिर्दुरितनिकरहारित्वद्यशःपुण्यकारि ॥ ५१ ॥

थोक्तस्सन् अहहेत्पदद्भुतोद्रेके अहहेत्यद्भुतेखेदेइत्यमरः व्यसुर्विगतप्राणस्समधिगतपञ्चत्वइतियावत् भवेज्जायेत समनुष्यः द्राग्झटिति प्राणपरिहाणादनन्तरमेवमुक्तानाम्प्राप्त कैवल्यानाम् अग्रगण्योऽग्रेसरः प्रथमपरिगणनीयइतियावत् नभवतिकिमु भवत्येवेत्यर्थः अनेनश्रीगङ्गाजले ईश्वरस्मरणपूर्वकम्प्राणपरित्यागस्यालौकिकफलहेतुत्वाद्दुर्लभत्वन्ध्वनितम् ॥ ५० ॥ अथपूर्वार्द्धेनानवलोकितगङ्गाजलनयननैष्फल्यम् उत्तरार्द्धेनानाकर्णितगङ्गाकीर्त्तिश्रुतिनिरर्थकताञ्चकथयन् श्रीगङ्गांस्तौति भगवतीति हेभगवतिसर्वेश्वरि श्रीगङ्गे याभ्यांनयनाभ्यान्नेत्राभ्याम् हरिचरणनिसृष्टंविष्णुपदपद्मजनितम् इत्यत्यन्तपावनत्वोक्तिः तेतव अम्बुजलम् नदृष्टंनस्वगोचरीकृतम् ताभ्यामाभ्याम्पुरस्स्थिताभ्यामङ्घ्रिद्वयस्पृष्टाभ्यांवानिष्फलाभ्यामुत्पत्तिफलशून्याभ्याम् नयनाभ्यामस्मदादिजनानान्नेत्राभ्याम् किम् नकिमपिफलमित्यर्थः अथच हेदेविश्रीगङ्गे याभिः श्रुतिभिः श्रवणेन्द्रियैः दुरित

निकरहारि श्रवणमात्रादेवपापराशिनिर्म्मूलनकारि अथ पुण्यकारि सुकृतजनयितृ पुण्यंशोभनेत्रिपु क्लीवन्धर्म्मेचसुकृतेऽदतिमेदिनी त्वद्यशस्त्वत्कीर्त्तिः नश्रुतन्नाकर्णितम् नस्वविषयीकृतमित्यर्थः ताभिराभिः प्रसिद्धाभिः अस्मदादिजनसम्बन्धिनीभिः श्रुतिभिः किम् नकापिफलसिद्धिरितिभावः अनेनप्राणिभिस्स्वनयनसाफल्यकृते श्रीगङ्गादर्शनम् स्वकीयश्रुतिसार्थकतायैश्रीगङ्गायशः श्रवणञ्चावश्यमेवविधेयमितिसूचितम् ॥ ५१ ॥ अथश्रीगङ्गाजलस्पर्शपराङ्मुखहस्तनिन्दाद्वाराश्रीगङ्गांस्तौति किमिति हेभगवतिपूर्णैश्व-र्य्यादिके श्रीगङ्गे यैर्हस्तैरेतन्मानवकरैः अपरिमितानामसङ्ख्यातानाम् महताम्बहुलतरपीडाप्रदत्वाद्बृहताम्ब्रह्महत्याप्रमुखानाम् अघानाम्पापानाम् प्रोद्धुरःप्रोत्कटः यः उत्साहो नानाविधमहाक्लेशप्रदानस्वरूपस्समाकाङ्क्षाविशेषः तम् भिनत्तिच्छिनत्तिनाशयतीत्यर्थः सतथोक्तः तेतवजललेशोऽम्भःकणः कदाचिदपि नो अधारि धृतः हेअमरनदिदेव तरङ्गिणि चर्मखण्डादपि अशस्तैर्निकृष्टैः तत्तुतत्तत्कार्य्योपयोगित्वात्सफलमेवेतिभावः यतः सुकृतलवनिरस्तैर्भवदीयजलस्पर्शप्रभावजनितपुण्यलेशविरहितैः अङ्गुलीभिःकर

किममरनदिहस्तैश्चर्म्मखण्डादशस्तैस्सुकृतलवनिरस्तैरङ्गुलीभिस्समस्तैः । अपरिमितमहाघप्रोद्धुरोत्साहभित्तेभग-
वतिजललेशोऽधारिनोयैःकदाचित् ॥ ५२ ॥ भगवतिपयसातेस्वर्गिभिर्दुर्ल्लभेनस्मृतिदुरितहरेणश्रीप्रदस्पर्शनेन ।
सकलमहहयेषाञ्जायतेकर्म्मतेषाङ्किमुकथयितुमीशःपुण्यराशिम्फणीशः ॥ ५३ ॥

शाखाभिः समस्तैःपरिपूर्णैः भवदीयजलधारणयोग्यैरपीत्यर्थः तैर्हस्तैः किम् नाकिमपिफलमितिभावः अन्यप्रकारविशेषसाध्यानाङ्कर्म्मणांनिर्वाहस्तुतद्भिरहितैरपिक्रियते अत स्तदेकानासक्तत्वादिमेनिष्फलाएवेतितात्पर्य्यार्थः अनेन निजहस्तसाफल्यायविवेकिभिर्ज्जनैः श्रीगङ्गाजलेनतर्प्पणसन्ध्योपासनादिकर्म्मापराङ्मुखैरवश्यमेवभाव्यमितिध्वनि-तम् ॥ ५२ ॥ अथश्रीगङ्गाजलेनैव साधितसर्वकृत्यानांन्दणाम्भाग्यातिशयवर्णनद्वाराश्रीगङ्गांस्तौति भगवतीति हेभगवतिभगवन्नारायणसम्बन्धातिप्रशंसनीयमहत्त्वेश्रीगङ्गे स्वर्गिभिःकेवलमधुररसास्वादफलकसुधापानैकलग्नमनस्कैस्स्वर्गवासिभिर्देवैः दुर्ल्लभेनदुष्प्रापेण स्मृत्याखस्मरणमात्रेणैव दुरितानान्दुष्कृतानाम् हरतीतिहरम् पचाद्यच् तथा क्तेन श्रीस्त्रिवर्गसम्पत्तिर्म्मोक्षलक्ष्मीर्वा ताम् प्रकर्षेणसमग्रतोत्कर्षेण ददातिवितरतीतितथोक्तम् स्पर्शनंस्नानपानाद्युपयोगीस्पर्शः यस्य:तत्तथोक्तम् तेन तेतव पयसाजलेन ॥१५॥

अहहेत्यङ्गते येषांशुभदैवानांमानवानाम् सकलंसम्पूर्णम् कर्म्मंस्नानपानशरीरशुद्ध्यादिकार्य्यम् भवतीतिशेषः दैवयोगात्कूपादिजलालाभेभवदीयजलेनैवयेसाधितसकलकर्म्माणो भवन्तीतिभावः तेषाम् पुण्यराशिन्तज्जनितसुकृतपरम्पराम् पूर्वसम्पादिततन्निदानीभूतधर्म्मकर्मसमूहंवा कथयितुम्परिसङ्ख्यातुम् फणीशस्सहस्रवदनःश्रीशेषोभगवान् ईशःप्रभुस्समर्थइत्यर्थः किमु नैवेत्यर्थः ईशःप्रभौमहादेवे इतिमेदिनी उक्तञ्चकाशीखण्डेऽष्टाविंशतितमेऽध्याये सर्वाणियेषाङ्गाङ्गैयैस्तोयैः कृत्यानिदेहिनाम् भूमिस्थाअपितेमर्त्या अमर्त्याएववैहरे इतिविष्णुम्प्रतिमहेश्वरेण अनेनातीवशुभभाग्यावाप्तश्रीगङ्गाजलानिशोपभोगभाजोजनास्सफलजन्मानोवदनसहस्रेणापिशेषानाख्येयमहिमानइतिध्वनितम् ।५३। अथचासमाप्ति सप्तचत्वारिंशत्पद्यकदम्बकेनभङ्गीविभेदैः श्रीगङ्गांस्तोतुमारभमाणःकविः प्रथमेन श्रीकाशीसर्वस्वत्वेनवर्णयन् श्रीगङ्गांस्तौति पुरेति हेजह्नुकन्येश्रीगङ्गे पुरहरपुरे त्रिभुवनविजयसमुद्धतशासनासुरराजत्रिपुरासुरवधकारिश्रीमन्मदनारिराजधान्यांश्रीकाश्याम् योवासोनिवासः इतरदेशयियासापरित्यागपुरस्सरावस्थितिरित्यर्थः तत्र यः

पुरहरपुरवासप्रेमहेतुस्त्वमेव पुरहरपुरशोभाभारहेतुस्त्वमेव ।
पुरहरपुरवासिक्षेमहेतुस्त्वमेव पुरहरपुरसारञ्जह्नुकन्येत्वमेव ॥ ५४ ॥

प्रेमा यत्प्रेमवा स्नेहः मानसासक्तिरितियावत् प्रेमानाप्रियताहार्दम्प्रेमस्नेहइत्युभयत्राप्यमरः तस्यहेतुःकारणम् हेतुर्नाकारणम्बीजमित्यमरः त्वमेव असीतिशेषः एवमग्रेऽपि एवकारोऽन्यनिवृत्तिपरत्वेनावधारणे श्रीकाशीवासान्तरायीभूतनानोपद्रवसहनपूर्वकमत्रत्वदभावेकोवसेदितिभावः अथच पुरहरपुरस्य शोभायास्सौन्दर्यस्यदर्शनीयताया इतियावत् यः भरएवभारोऽतिशयः सङ्ख्यायागुरुत्वपरत्वेनभारोराशिः तस्यापिहेतुस्त्वमेवभरोऽतिशयभारयोः भारोदशशतीद्वये पलानांवीवधेचापीत्युभयत्रापिहेमचन्द्रः त्वांविनाकास्यशोभेतिभावः अथच पुरहरपुरवासिनांश्रीकाशीवासिनाम् प्राणिनाम् क्षेमस्यभवदुःखपरम्परानिवृत्तिलक्षणस्यमङ्गलस्य श्वःश्रेयसंशिवम्भद्रङ्कल्याणंमङ्गलंशुभम् भावुकम्भविकम्भव्यङ्कुशलङ्क्षेममस्त्रियामित्यमरः हेतुःकारणम् त्वमेव अन्यथा काश्यामपिविहितपापानान्दण्डाङ्कुथङ्कल्याणमितिभावः अथच पुरहरपुरे सारंवरंवस्तुत्वमेव अन्यथा कोटिब्रह्माण्डनायकः श्रीविश्वनाथः प्राणाधिकप्रियांश्रीपार्वतीमपि [illegible] कुलभूपालकलानिधिकलाञ्चभालेविन्यस्य सर्वं

थैवादरणीयनिजजटाजूटप्रदेशेकथंसादरंसगौरवञ्चभवतीन्धृतवानितिभावः अनेन श्रीगङ्गायाःश्रीकाशीजीवातुत्वंसूचितम् अथचात्र सारोबलेस्थिरांशेचमज्ज्ञिपुंसिजलेधने न्याय्येक्लीवन्त्रिषुवरे इतिमेदिनिकरोक्तेः वरार्थकस्यसारशब्दस्ययद्यपिक्लीत्वमेवोचितम् तथापि संसारसारमवलातस्याःसारङ्गनाश्लेषः तस्यापिसारमम्बराविरहितवक्षोरुह स्पर्शइत्यलङ्कारतिलकेश्रीमद्वाग्भटोलेखात् राज्येसारंवसुधावसुन्धरायाम्पुरम्पुरेसौधम् सौधेतल्पन्तल्पेवराङ्गनाऽनङ्गसर्वस्वमितिकाव्यप्रकाशेश्रीमन्मम्मटोलेखाच्चनपुंसकत्वमपि साधीयएवेत्यनुसन्धेयम् अथचात्र सानुस्वारोविसर्गान्तोदीर्घोयुक्तपरश्चयः वापादान्तेत्वसौग्वक्रइतिभट्टकेदारोक्तौटीकाकृताभास्कररायेण यद्यपि पादोऽत्रसमोग्राह्य इत्युक्तम् तथापि तस्याःखुरन्यासपवित्रपांसुमपांसुलानान्धुरिकीर्त्तनीयेति आसीदनाविष्कृतदानराजिरन्तर्मदावस्थइवाद्विपेन्द्रइति विसृष्टपार्श्वानुचरस्यतस्यपार्श्वद्रुमाः पाशभृतासम- स्येतिचरघुवंशेद्वितीयेसर्गेकालिदासकृतौ कौवेरादिग्भागमपास्यमार्गमागस्त्यमुष्णांशुरिवावतीर्णइति यतोवृहत्यार्वणचन्द्रचारुतस्यातपत्रम्बिभराम्बभूवेइति अवापबाल्यो-

विबुधनदि मिलित्वाऽयन्त्वयैव प्रयागः प्रभुरभवदयत्नात्तीर्थवृन्दस्य सद्यः ।
गिरिपरिवृढकन्याभीत चित्तोऽपि शम्भु श्शिरसि वसति मुग्धे ईत्तवान्नैव ते किम् ॥ ५५ ॥

चितनीलकण्ठपिच्छावचूडाकलनामिवोर इतिचशिशुपालवधेतृतीयेसर्गेमाघकृतौ प्रसह्यचेतस्सुसमासजन्तमसंस्तुतानामपिभावमार्द्रमिति निरास्पदम्प्रश्नकुतूहलित्वमस्मा- स्वधीनङ्किमुनिस्पृहाणामिति त्वयाविपत्स्वप्यविपत्तिरम्यमाविष्कृतम्प्रेमपरङ्गुणेष्वितिचकिरातार्जुनीयेभारविकृतौ चक्रेसचक्रनिभचङ्क्रमणच्छलेननीराजनाञ्जनयतान्निजवान्धवा नामिति नैषधीयेद्वितीयेसर्गेश्रीहर्षकृतौच विषमेऽपिपादेऽन्त्यलघोर्गुरुत्वदर्शनात् एवकारान्तरवर्त्तिनोह्रस्वस्याकारस्यगुरुत्वेननच्छन्दोभङ्गः एवमन्यत्राप्यूहनीयम् ॥ ५४ ॥ अथश्रीगङ्गायाः श्रीप्रयागमाहात्म्यकारणतांशिरोऽवस्थितिदानेनश्रीमन्महादेवाद्वासगौरवताञ्चवर्णयंस्तांस्तौति विबुधेति हेविबुधनदिदेवनदिश्रीगङ्गे अयम् लोकेवेदादौचाप्रसिद्ध तरः प्रयागः एतन्नामकस्तीर्थविशेषः त्वयैव मिलित्वा सङ्गत्यसद्यस्त्वरितमेव अयत्नाज्जपोपवासादिप्रयासातिशयंविनैव तीर्थवृन्दस्यनिखिलभुमण्डलपुण्यक्षेत्रसमूहस्य प्रभू राजा अभवत्सञ्जातः प्रयागस्यतीर्थराजत्वे भवदीयसमागएवकारणमस्तीतिभावः अतएव गिरिपरिवृढस्यपर्वतराजस्यहिमालयस्य राजाऽधिपःपतिः स्वामीनाथःपरिवृढःप्रभुः ॥१६॥

ईश्वरोविभुरीशानोभर्त्तेन्द्रइनईशितेत्युभयत्रधनञ्जयः तस्य याकन्यापुत्रीसकलभुवनेश्वरीश्रीपार्वती तस्यास्सकाशात् भीतम् एतच्छिरोनिवेशनेन जगदीश्वरीमद्धर्म्मपत्नीश्रीगौरी रुष्टानभवेदित्यापन्नभयम् चित्ताश्चिन्तनधर्मप्रधानश्चेतोयस्यसतथाभूतस्सन्नपि शम्भुर्निखिललोककल्याणविधानवद्धपरिकरश्श्रीमहादेवः उच्चैरत्यन्तोन्नते शिरसिमूर्द्धनि वसतिमवस्थानम् वसतिस्स्यादवस्थानेनिशायांसदनेऽपिचेतिहेमचन्द्रः तेतुभ्यम् नैवदत्तवान्किम् अपितुदत्तवानेव त्वमेतादृशातिप्रशंसनीयमाहात्म्यातिशयशालिन्यसि याम् निजार्द्धशरीररूपायाः परमप्रेमास्पदीभूतायानिजपाणिगृहीत्याःकोपजत्रासादिकमपिविषह्य उत्तमतरनिवेशनंनिजोत्तमाङ्गमेवसदाशिवोनीतवानितिभावः अनेनश्रीगङ्गाया स्तीर्थराजप्रयागमाहात्म्यातिशायिमाहात्म्यशालित्वंश्रीगौरीगौरवविजयिगौरवाश्रयत्वञ्चध्वनितम् ॥ ५५ ॥ अथचैकदा सानन्दम् सवयस्यः श्रीवाराणसीपरिसरसुरसरिद्रो- धसिनिषण्णः श्रीमांस्तत्रभवाँल्लक्ष्मीनारायणःकविः मन्दमन्दम् श्रीगङ्गायाःप्रवाहे चलन्तम् यथादृष्टचरम् कञ्चनमानवंशवंमहाभाग्यतयावर्णयंस्तांस्तौति करटेति हेजह्नुजेश्रीगङ्गे

करटनिशितचञ्चूभिन्ननेत्रप्रदेशो लसदुदरगुरुत्वः कीर्णकेशोऽचलाङ्गः ।
त्वदमलविततांभोरम्यशय्य श्शवोऽयं वद खलु कमकार्षी ज्जह्नुजे पुण्यपुञ्जम् ॥ ५६ ॥

करटस्यमस्तकस्थस्यकाकस्य काकेतुकरटारिष्टबलिपुष्टसकृत्प्रजाः ध्वाङ्क्षात्मघोषपरभृद्बलिभुग्वायसाअपीत्यमरः निशिताऽतितीक्ष्णाग्राया चञ्चूस्त्रोटिः तया भिन्नः तद्गतक नीतिकाभक्षणार्थंविदीर्णीकृतः नेत्रप्रदेशश्चक्षुरिन्द्रियगोलकप्रदेशोयस्यसतथोक्तः लसच्चमत्कृतिसत् उदरगुरुत्वम् चिरायजलसम्बन्धवशाज्जठरवृद्धिर्यस्यसतथोक्तः कीर्णा मुक्तग्रन्थित्वाद्विष्वक्प्रसृमराः केशाश्शिरोरुहायस्यसतथोक्तः अचलानितरङ्गपवनादिदोषविरहितत्वादचञ्चलानि अङ्गान्यवयवायस्यसतथोक्तः अङ्गङ्गात्रेप्रतीकोपाययोः पुम्भूम्निनीवृतीतिमेदिनी दूरतस्सानन्दंसुप्तवत्प्रतीयमानत्वात् तव अमलंस्वच्छम् विततमुन्नतानतभावशून्यत्वात् विस्तृतम् वितततेत्यत्रविशदेतिपाठे विशदंशुभ्रम् यदम्भ स्तोयम् तदेव रम्यारमणीया शय्याशयनीयंयस्यसतथोक्तः शय्यायांशयनीयवत् शयनमित्यमरः अयंममदृष्टिविषयः शवःकुणपः मृतकशरीरमित्यर्थः कुणपश्शवमस्त्रिया मित्यमरः काङ्क्षिस्वरूपम् पुण्यपुञ्जंसुकृतराशिम् जीवदवस्थायामकार्षीदकरोत् इति त्वम् खलुनिश्चयेन वदकथय अन्यथा कथमियमतीवदुर्लभाव्यवस्थितिरितिभावः अनेन

जन्तोश्शवभस्मकणस्यश्रीगङ्गाजलस्पर्शवैभवात्सद्गतिर्भवति समग्रशवस्यश्रीगङ्गाप्रवाहपातेतुनजानेकिम्फलमितिसूचितम् ॥ ५६ ॥ अथश्रीगङ्गायानिखिलहृदयजातसमदृष्टि तत्त्वविज्ञानानुरागविषयत्वेनलोकोत्तरशक्तिविशिष्टत्वम्प्रतिपादयंस्तांस्तौति परिहृतेति हेभगवतिगङ्गे परितस्सर्वतोबाह्याभ्यन्तरभेदात् हृतस्त्यक्तः सुतदारप्राज्यराज्यप्रसङ्गः पुत्रकलत्रनिरातङ्काखण्डभूमिपतित्वसम्बन्धोयैस्तेतथोक्ताः सर्वम्परिहायगृहीतसन्न्यासाइत्यर्थः अथच हरिविधिसुरराजस्थानानांवैकुण्ठब्रह्मलोकामरावतीसमाख्यानाम् या लिप्सालब्धुमिच्छा तया विशेषेणसर्वथैव हीनारहिताः आत्मलाभेतेषामप्यकिञ्चित्करत्वादितिभावः अथच मणिष्वपि अनर्घरत्नेष्वपि तृणसममतितुच्छतया तृणवत् चित्त-श्चेतोयेषान्तेतथोक्ताः यद्वा मणितृणयोः सममुत्तमाधमवैषम्यहीनञ्चित्तंयेषान्तेतथोक्ताः शरीरयात्रामात्रोपयोगिवस्तुसत्कारकारिणइत्यर्थः यतस्तत्त्वज्ञानिनोऽपिसञ्जाततत्त्व विवेकाअपि मानवामनुष्याः त्वयिविषये लोभिनोलोभवन्तः त्वत्त्यागमसहमानाइत्यर्थः सन्तीतिशेषः एतच्चित्रमतीवाश्चर्यमितिभावः अनेन ययातत्त्ववेतारोऽपिस्वमहिम्नास्व

परिहृतसुतदारप्राज्यराज्यप्रसङ्गा हरिविधिसुरराजस्थानलिप्सा विहीनाः। मणितृणसमचित्ता मानवाज्ञानिनोऽपि
त्वयि भगवति गङ्गे लोभिन श्चित्रमेतत् ॥ ५७ ॥ गमिति ननु कथञ्चिन्मानवःकोऽपि गङ्गे परिपठति यदैव क्वापि
देशे स्थितोयः। वद किमु न तदीयाःपापपुञ्जा स्तदैव स्फुरदनुपमकम्पा दूरतो विद्रवन्ति ॥ ५८ ॥

विधेयीकृताः तस्यास्तवप्रभावातिशयङ्कोवर्णयेदितिध्वनितम् ॥ ५७ ॥ अथकथमपिगङ्गापदपूर्वभागीभूतगमित्युच्चारणमाहात्म्यदर्शनद्वाराश्रीगङ्गांस्तौति गमितीति हेगङ्गे यः कोऽपिमानवः पण्डितत्वोत्तमवर्णाश्रमत्वापेक्षानेनुसन्धानेनमनुष्यविग्रहमात्रभृत् ननुनिश्चये क्वापिदेशेपूतापूतविवेकविरहेणकस्मिंश्चिदपिमूर्ध्यादिप्रदेशे स्थितोवर्त्तमानस्सन् कथञ्चित्केनापिप्रकारेण गङ्गागङ्गागण्डगन्तृगन्धेत्याद्युच्चारणस्वरूपेण यदैवयस्मिन्नेवसमये गमिति गङ्गेतिभवन्नामाद्यक्षरम् परिपठतिसमुच्चारयति तदैवतस्मिन्नेवकाले उच्चारणसमकालमेव नतुविलम्बेन तदीयास्तत्पाठकजनसम्बन्धिनः पापपुञ्जादुष्कृतराशयः स्फुरदनुपमकम्पाऽद्यदतुलवेपथवस्सन्तः दूरतोऽतिदूरम् नविद्रवन्तिनपला यन्तेकिम् त्वम् वदकथयेतिपूर्वोक्तसमर्थनप्रश्नः अपितु तम्परित्यज्यकम्पमानाः क्वचिद्दूरप्रदेशेलीनाभवन्तीतिभावः अनेनप्रकरणवशान्नामैकदेशोच्चारणस्यापि यदीदृक्फलम् ॥१७॥

तर्हिश्रद्धया ज्ञानपूर्वकम् गङ्गेतिसमग्रपदोच्चारणेकियत्फलमितिकोवेदेतिसूचितम् ॥ ५८ ॥ अथनिखिलामरसुखलाभजगज्जीवातुधर्मस्थितिकारणत्वंश्रीगङ्गायांव्यवस्थापयंस्तां स्तौति विबुधेति हेसुरनदिनिर्ज्झरधुनिगङ्गेदेवि विबुधपतिपुरोगाइन्द्रादयोदेवाः भगवत्या ऐश्वर्य्यादिषड्गुणशोभिन्या भगवत्यात्वयैव प्रोल्लसद्दिव्यभोगाःप्रोल्लसद्दलौकिक शर्म्माणोजातास्सम्पन्नाः त्वत्सेवयैवस्वर्ग्गादिसुखलाभस्तेषामितिभावः अथच हेजननिमातः सपरिवाराजपहोमदानदेवार्चनादिनिजपरिजनसहितः अयम् दृश्यः प्रवर्त्तमानः वर्णाश्रमस्थितिहेतुर्धर्म्मस्सुकृतविशेषः आचारविशेषोवा धर्म्मोऽस्त्रीपुण्यआचारेस्वभावोपमयोःक्रतौ अहिंसोपनिषन्न्यायेनाधनुर्यमसोमभइतिमेदिनी त्वयैव लालितश्शिशुवत्सादरंसंरक्षितस्सन् जगतिभुवने गुर्वीमतिबहुलाम् प्रतिष्ठाङ्गौरवम् नव्रजतिनप्राप्नोतिकिम् अपितुव्रजन्त्येवेत्यर्थः अनेनश्रीगङ्गायालोकोत्तरवैभवशालित्वंसूचितम् ॥ ५९ ॥ अथश्रीगङ्गायास्स्मरणादिचतुष्टयस्यमाहात्म्यव्यवस्थान्दर्शयंस्तांस्तौति स्मरतीति हेजननिगङ्गे यःकोऽपिजनः त्वांस्मरणीयगुणगणाम्भवतीम् स्मरतिध्यायति सजनः अति

विबुधपतिपुरोगाः प्रोल्लसद्दिव्यभोगा स्सुरनदि भगवत्या देवि जाता भवत्या । जननि जगति धर्म्मो लालितोऽय न्त्वयैव
व्रजति सपरिवारः किन्न गुर्वी म्प्रतिष्ठाम् ॥ ५९ ॥ स्मरति जननि यस्त्वा जायते सोऽति पूत स्तव पयसि च गङ्गे
स्नाति य श्शङ्कर स्सः । पिबति तव जलं यःसोऽस्ति मातः परात्मा वसति च तव तीरे यो न जाने स कोऽस्ति ॥ ६० ॥

पूतोऽतिपवित्रोदुरितविरहितइत्यर्थः जायतेभवति अथ हेगङ्गे तव पयसिजले प्रवाहे प्रविश्येत्यर्थः यः स्नातिशरीरनिमज्जनंविदधाति सः शङ्करश्शिवरूपोजायते हेमातः अथच यः तव जलन्दुरितापगमपूर्वकसुकृतसमूहोत्पादनपटुतरम्पानीयम् पिबति सः परात्मासाक्षात्परब्रह्मस्वरूपोजायते सांसारिकदुःखविरहितोभवतीत्यर्थः अथच यस्तव तीरे त्वदीयतटप्रदेशपार्श्वे वसतिनिवासम् कुरुते अर्थात् तवतटेनिवसन् प्रत्यहमेव दर्शनस्नानपानादिभिस्त्वदीयजलोपभोगंविदधाति सः कोऽस्तीत्यहंनजाने न निश्चिनोमीत्यर्थः ब्रह्मत्वाधिकस्याभावादितिभावः अनेनाद्भुतमाहात्म्याऽसीतिध्वनितम् ॥ ६० ॥ अथचातिबीभत्सपापविधायिजनसमुद्धाराख्यानव्याजेन विचित्रप्रभावां श्रीगङ्गां स्तौति श्रुतीति हेभगवति सुरवन्द्ये देवनमस्करणीये श्रीगङ्गे ये केपि मानवामनुष्यदेहमात्रधारिणः श्रुतिकटुतरनाम्नांनामममात्रश्रवणात्कर्णव्यथोत्पादकानामतीवकुत्सितानामित्यर्थः

एतस्तांमातृभगिनीगुरुपत्नीप्रभृतिगमनादिपापानाम् आश्रयास्तत्कर्तृत्वादाधाराः येच निजैरात्मीयैःपितृभ्रातृपुत्रादिभिः कुलजनैरात्मीयवंशीयजनैः एकवंशात्पत्त्या लब्धसम्बन्धैर्ज्ञनैश्च मुक्ताः विहिताश्लीलपापप्रायश्चित्तविधानयोग्यताऽनास्पदत्वात् सहयासैकासनैकपङ्क्तिभोजनादौदूरतःपरित्यक्ताः अतएव क्वापिकचिदपि आस्थांस्थितिंस्वोद्धारा यावलम्बनमित्यर्थः नगतानप्राप्ताः आस्थायत्नालम्बनयोरास्थानापेक्षयोरपीतिहेमचन्द्रः तेपूर्वोक्ताजनाः अथनिर्दिष्टदशानन्तरम् अतिगुण्यांलोकातिशायिदीनदयालुत्वादिगुणगणोपेताम् शरण्यांशरणेशरणागतजनरक्षणे साध्वीचतुराऽतिशक्तेत्यर्थः सातथोक्तानाम् त्वाम्भवतीम् समुपेत्य सम्यक् सश्रद्धाभक्ति शरणागतत्वेनप्राप्य प्रतीक्ष्यानिष्फलमषत्वात्सर्वजनैःपूज्याः नभवन्तिकिम् अपितुभवन्त्येवेतिभावः पूज्यःप्रतीक्ष्यइत्यमरः अनेनश्रीगङ्गायाः अगतिकगतित्वंसूचितम् ॥ ६१ ॥ अथस्वस्मिन्पापाश्रयत्वधर्मकर्मविरहितत्वेश्रीगङ्गायान्दुरितनिवारकत्वमहैश्वर्यप्रदातृत्वेचनिरूपयंस्तांस्तौति जननीति हेजननिमातः लोकेऽत्रजगति मन्मत्तः अधिकः अत्रैकम्पदम्पदद्वयंवेत्यनुसन्धेयम् एवमग्रेऽपि

श्रुतिकटुतरनाम्ना मेनसा माश्रया ये निजकुल जनमुक्ता क्वाऽपि नास्थाङ्गता ये । भगवति सुरवन्द्ये तेऽ तिगुण्यां शरण्या ङ्किमथ नसमुपेत्य त्वा म्भवन्ति प्रतीक्ष्याः ॥ ६१ ॥ जननिमदधिकःकःपापकर्म्माऽस्तिलोकेजननिमदधिकः कःक्षीणधर्म्माऽस्तिलोके । जननिसमधिकःकस्त्वद्विधाताविशुद्धेर्जननिसमधिकःकस्त्वत्प्रदातासमृद्धेः ॥ ६२ ॥

कः पापकर्मा पापहेतुकर्मकारी अस्ति नकोऽपीत्यर्थः लोकोत्तरपापकर्मकर्त्ताऽहमेवात्रेतिभावः अथ हेजननि विशुद्धेर्निखिलपापराहित्यस्य विधाताकर्त्ता त्वत्त्वत्तः समधिकस्समतिशायीसमर्थतरइत्यर्थः कः त्वांविनानकोऽपीत्यर्थः अथच हेजननि समृद्धेस्सर्वालौकिकवस्तूपचयस्य प्रदाता त्वत्त्वत्तः समधिकःकः नकोऽपीत्यर्थः त्वमेवैतादृशीतिपरमार्थः अनेनास्मिन्ब्रह्माण्डेऽधमतरोऽहमेवास्मि अथाधमतरोद्धारिणीत्वमेवासीतिसूचितम् ॥ ६२ ॥ अथगङ्गासप्तम्यादौनानाविधसामग्रीभिः श्रीगङ्गायाःपूजनमाहात्म्यंवर्णयंस्तांस्तौति विविधेति हेसुरनदि गङ्गेदेवि यःपुण्यवाञ्जनः विविधानाम्बहुभेदानाम् तत्तदृतूत्पन्नानाम् कुसुमानाम्पुष्पाणाम् जालैर्वृन्दैः तद्ग्रथितमालाभिरित्यर्थः यद्वा जालैरानायैर्वितानाद्युपयोगिभिरित्यर्थः साम्भोजमालैर्ग्रीवानिहितविकसितकमलस्रगतिरमणीयैः बहुभिःप्रचुरैरनेकैरित्यर्थः विशालैर्विपुलैः क्षीरकुम्भैर्दुग्धपूर्णघटैश्च रसालैः ॥१८॥

परिपक्वैरतिपुष्टैः इक्षुभिराम्रफलैर्वा रसालं सिह्लकेवोलेरसालश्चेक्षुचूतयोरितिमेदिनी रसभरैर्मधुरादिसमुपादेयरसबाहुल्यैस्स्वादबाहुल्यैर्वा परिपूर्णास्सम्भृताः तैः रसोगन्ध रसेजले शृङ्गारादौविषेवीर्य्येतिक्तादौद्रवरागयोः देहधातुप्रभेदेचपारदस्वादयोःपुमानितिमेदिनी भक्ष्यभोज्यादिभिः पदार्थैश्च आदिनालेह्यादिग्रहः त्वाम्भवतीन् यजतेपूजयति तस्य पुण्यंसुकृतम् कः वदेदियत्तयाकथयेत् नकोऽपीत्यर्थः परिगणनीयप्रमाणाधिकसुकृतशालीसइत्यनेनसूचितम् अथवैशाखशुक्लगङ्गासप्तम्यादौकर्त्तव्यः श्रीगङ्गापूजनविधिः वस्त्राच्छन्नवाच्छिद्रजलपूर्णघटस्थिताम् सौवर्णीराजतींयद्वागङ्गामूर्त्तिम्प्रपूजयेत् ॥ १ ॥ अथध्यानम् वराभीत्यम्भोजस्फटिकघटहस्तान्त्रिनयनांशरच्चन्द्रज्योत्स्नामदविजयिनीं स्वांशुपटलैः सुराच्र्यांसख्याढ्यांवरवसनभूषांमकरगामहंश्रीगङ्गेत्वामिहहृदिदधेपाहिभवतः ॥ २ ॥ अथावाहनम् ॥ ब्रह्माद्यैरर्च्चनीयायात्रिलोकीभूषणश्रया ॥ श्रीगङ्गेसात्वमा-याहितिष्ठात्रस्वागतन्तव ॥ ३ ॥ इत्यावाहनम् ॥ श्रीमन्मुरारिपादाब्जस्पर्शपूतजलोद्भवे ॥ गङ्गेगृहाणमद्दत्तामिदम्पाद्यङ्कुरु ॥ ४ ॥ इतिपाद्यम् ॥ यन्नामस्मरणान्मर्त्योजायते

विविधकुसुमजालैर्देविसाम्भोजमालैर्बहुभिरपिविशालैःक्षीरकुम्भै रसालैः ।
रसभरपरिपूर्णैर्भक्ष्यभोज्यादिभिर्यस्सुरनदियजतेत्वाङ्कोवदेत्तस्यपुण्यम् ॥ ६३ ॥

ऽत्यन्तशुद्धिभृत् ॥ श्रीगङ्गेसात्वमेवैतद्गृहाणाचमनीयकम् ॥५॥ इत्याचमनीयम् ॥ दध्यादिनिर्म्मितङ्गङ्गेदिव्यंस्वादुमनोहरम् मधुपर्कङ्गृहाणेमंसर्वदाभवसर्वदा ॥ ६ ॥ इतिमधुपर्कः ॥ श्रीचन्द्रमौलिमौलिस्थेश्रीगङ्गेत्रिदशार्चिते ॥ शुद्ध्यैमुखस्यभूयोऽपिगृहाणाचमनीयकम् ॥ ७ ॥ इतिपुनराचमनीयम् ॥ शुद्धयेतवदेवेशिजगतांशुद्धिकारिणि जलैस्तीर्थोद्भवैर्गङ्गेस्नानन्तेकल्पयाम्यहम् ॥ ८ ॥ इतिस्नानम् ॥ मुक्तयेनिजभक्तानाङ्कृताविर्भावसद्दये । गङ्गेगृहाणहेमाढ्यंनीलपट्टाम्बरद्वयम् ॥ ९ ॥ इतिवस्त्रद्वयम् ॥ स्वभावसुभगेगङ्गे नानामणिगणाद्भुतम् । कारुण्येनगृहाणेमंसौवर्णम्भूषणव्रजम् ॥१०॥ इतिभूषणानि ॥ त्रैलोक्यव्यापिसौरभ्यंमनोहारिणमुत्तमम् । श्रीगङ्गेकृपयागन्धमङ्गीकुरुविधेहिशम् ॥ ११ ॥ इतिगन्धः ॥ शीतस्पर्शानिरम्याणिसुगन्धीन्यमलानिच । गङ्गेगृहाणपुष्पाणिकल्याणङ्कुरुसर्वदा ॥ १२ ॥ इतिपुष्पाणि ॥ नानाविधैरतिस्वच्छैर्गन्धद्रव्यैस्सुसाधितम् । जह्नुकन्ये गृहाणेमन्धूपंवर्द्धयसम्पदः ॥ १३ ॥ इतिधूपः ॥ शुद्धवर्त्तिःपवित्राज्योमहाद्योतस्तमोऽपहः । मणिहेममयोदीपोमयागङ्गेऽर्पितस्तव ॥ १४ ॥ इतिदीपः ॥ मणिकाञ्चनपात्रेषु

नानारससुशोभनम् । भक्ष्यभोज्यादिकङ्गङ्गेनैवेद्यन्तेमुदेऽर्पितम् ॥ १५ ॥ इतिनैवेद्यम् ॥ शीतंलब्धमलम्पथ्यंवातघ्नंहृदयङ्गमम् । स्वादुगङ्गेगृहाणेदंहेमपात्रस्थितञ्जलम् ॥ १६ ॥
इतिजलम् ॥ पलालवङ्गकर्पूरकस्तूरीक्रमुकादिभिः । संमिश्रंमधुरङ्गङ्गेताम्बूलन्तेमयार्पितम् ॥ १७ ॥ इतिताम्बूलम् ॥ घनसारगवाज्याभ्यांसुवर्णेस्वर्णभाजने । सम्पादितमि
दङ्गङ्गेमयानीराजनन्तव ॥ १८ ॥ इतिनीराजनम् ॥ मनःप्रह्लादनेदक्षस्ससौरभ्योऽनुरागतः । श्रीगङ्गेत्वन्मुदेचैषमयापुष्पाञ्जलिःकृतः ॥ १९ ॥ इतिपुष्पाञ्जलिः ॥ ॐनमोभगवति
ऐंहिलिहिलिमिलिमिलिगङ्गेमाम्पावयस्वाहा इतिमूलमन्त्रेणवा अङ्गन्यासादिकंविधायसर्वांश्रीगङ्गापूजाकार्येत्यलम्पल्लवितेन ॥६३॥ अथपूर्वनिर्दिष्टपूजायाः स्नानपानाद्युपभोग
स्वरूपसेवायावा सकृदपिसम्पादनेमाहात्म्यन्दर्शयन् श्रीगङ्गांस्तौति कुशलमिति हेगङ्गेदेवि येजनाः इहलोके कुशलन्ददानाङ्कल्याणविधात्रीम् तेजसासर्वदेवाधिकप्रतापेन दीप्य
मानाम्प्रकाशमानाम् वृजिनदमनशक्तिम्पूर्वार्जितभक्तजनकलुषापगमक्षमसामर्थ्याम् जातासमुत्पन्ना भक्तेषुस्वस्मरणादिकर्तृजनेषु अनुरक्तिर्वात्सल्यस्वरूपोऽनुरागोयस्याः

कुशलमिहददानान्तेजसादीप्यमानांवृजिनदमनशक्तिञ्जातभक्तानुरक्तिम् । सकृदपिभवतींयेदेविगङ्गेभजन्तेकिमुनक-
लिकराग्रात्तेविमुक्ताभवन्ति ॥ ६४ ॥ यदवधिकिलगङ्गेप्रादुरासीद्वपुस्तेतदवधिनिरयाणांशून्यताऽभून्नितान्तम् । तद
वधिपुनरम्बस्वर्गभूर्भूरिशोभातदवधिजगदण्डन्देव्यखण्डंविदण्डम् ॥ ६५ ॥

साताम् भवन्तीन्त्वाम् सकृदप्येकवारमपि वहावृत्तेस्तुकाकथा भजन्तेसेवन्ते येजनाः कलेरेतन्नामकयुगाधिष्ठातृदेवस्य कराग्रात्समग्रात्करादित्यर्थः विमुक्ताःकलिकल्मष
विरहिताइत्यर्थः नभवन्तिकिम् अपितुभवन्त्येवेतिभावः अनेन गङ्गासेवा कलिदोषनिवारणातिशक्तेतिध्वनितम् ॥ ६४ ॥ अथश्रीगङ्गायाःप्रादुर्भावप्रभाववैभवन्दर्शयंस्तांस्तौति
यदवधीति हेगङ्गे यदवधियस्मात्कालात् तेतव वपुः प्रवाहरूपंशरीरम् प्रादुरासीत्प्रकटमासीत् तदवधितस्मात्कालात् किलेतिनिश्चयेऽलीकेचाक्यालङ्कारेऽपेतिह्येवा निरयाणां
नरकाणम् नितान्तमत्यन्तम् शून्यताजनराहित्यविशिष्टत्वम् अभूत् जाता हेअम्बमातः पुनर्भूयः तदवधितस्मात्कालात् स्वर्गभूर्नाकभूमिः भूरिशोभाऽतीवरमणीया अभूत् ॥१९॥
त्वत्सेवकानाम् दिव्यविग्रहंसमेत्यतत्रप्राप्तत्वादितिभावः किम्बहुना तदवधितस्मात्कालात् अखण्डम्परिपूर्णम् जगदण्डम्ब्रह्माण्डम् विदण्डंयमदण्डविरहितम् अभूत् मूर्त्ति

त्रयेण तत्रवर्त्तमानत्वादितिभावः अनेन श्रीगङ्गायाःप्रादुर्भावोजगदुपद्रवनिवारकइतिसूचितम् ॥ ६५ ॥ अथासम्भावनीयसमुद्धारस्यापिजनस्यश्रीगङ्गासमागमप्रभावात् इतर
समुद्धारकत्वन्निरूपयन् श्रीगङ्गांस्तौति सकलेति हेगङ्गे योजनः किलनिश्चयेन दूरदेशेऽपि समीपेतुकावार्त्तेत्यर्थः कथमपिकेनापिप्रकारेण श्रुतस्समाकर्णितस्सन् सकलानान्दि
विपदांनाकवासिनामिन्द्रादीनामपि चित्तंमनः पीडयत्येव सान्तस्तापमवश्यन्दुःखीकरोत्येवेत्यर्थः अपिचकिञ्च हेदेवि निगमविद्भिर्वेदाभिज्ञैर्वेदतदर्थावलम्बिधर्म्मशास्त्रप्रति-
पादिततत्तत्प्रायाश्चित्तव्यवस्थाप्रतिपादनेतिकर्त्तव्यताऽतिकुशलैरित्यर्थः योजनः अपाकृतोऽस्ति अत्युग्रपापकारित्वादस्यप्रायाश्चित्तविधानेवयमतीवकुण्ठितबुद्धयः अतोऽयम
तोदूरंयात्वितितिनिरस्तोभवति निगमाः पूर्वणि ग्वेद निश्चया ध्व वणिक् पथा इतिहेमचन्द्रः सजनः त्वांसकलशरणागतप्राणिसमुद्धारकर्मबद्धपरिकराम्भवतीम् उपेत्यसम्प्राप्य
नतुत्वयिस्नानादिकङ्कृत्वा स्नानादितःप्रागेवेत्यर्थः तेषान्दिविषदादीनाम् विशुद्ध्यैविशिष्टपावनतायै स्वविशुद्ध्यैकिमुवक्तव्यम् नप्रभवतिनसमर्थोभवतिकिम् अपितुप्रभवत्येव

सकलदिविषदां यः पीडयत्येवचित्त ङ्कथमपि किल गङ्गे दूरदेशे श्रुतोऽपि ।
अपि च निगमविद्भि र्देवि योऽपाकृतो ऽस्ति प्रभवति स उपेत्य त्वा न्न कि न्तद्विशुद्ध्यै ॥ ६६ ॥

समुपेत्येतिपाठेतु यत्तदोर्नित्यसम्बन्धइतिन्यायात्तच्छन्दोऽध्याहर्त्तव्यः सम्यक्श्रद्धानुरागसंस्कृतमनस्कस्सन्नुपेत्येत्यर्थकल्पनाचकर्त्तव्या अनेन श्रीगङ्गायास्समागमस्याचि-
न्तनीयःप्रभावस्सूचितः ॥ ६६ ॥ अथनिन्दाव्याजेनश्रीगङ्गायास्स्तुतिन्निरूपयंस्तांस्तौति त्वयीति हेसुरनदिदेवधुनि सोल्लुण्ठनेयंसम्बुद्धिः अद्येदानीम् त्वयिभवत्याम् उच्चैर्म
हती यादुर्न्नीतिर्दुष्टानीतिरन्यायशालितेतियावत् दृष्टा शास्त्रदृष्ट्यासमवलोकिता स्वमनोविषयीकृतेत्यर्थः अहहेत्याश्चर्य्ये सादुर्न्नीतिः भुवनेऽस्मिन्ब्रह्माण्डागोलके क्वापि हरिहर
विधिरविदेवीगजाननादौक्वचिदपिनास्तीतिशेषः नदृष्टेतिवा इत्यहम् सत्यममिथ्यैव ब्रवीमिकथयामि कुतइतिचेदतआह यद्यतः अपरीक्ष्य अयंविशुद्धिपूर्वकंमुक्तियोग्योऽस्तिनवे
तिपरीक्षामकृत्वैव प्रेक्षणादेवदृष्टिपातमात्रादेव पशवोगवादिकाः पतिताअप्रकृष्टकर्म्ममहिम्नासजातीयजनच्युताः पुलिन्दाश्चाण्डालविशेषाः भेदाःकिरातशवरपुलिन्दाइत्यमरः
व्रात्याःउपनयनसंस्कारशून्याः उक्तसावित्रीग्रहणकालातिक्रमणात् सावित्रीपतिताः व्रात्यस्संस्कारहीनस्स्यादित्यमरः आषोडशाद्ब्राह्मणस्यसावित्रीनातिवर्त्तते आद्वाविंशात

क्षत्रबन्धोराचतुर्विंशतेर्विशः अतऊर्द्ध्वन्त्रयोऽप्येतेयथाकालमसंस्कृताः सावित्रीपतिताव्रात्या भवन्त्यार्य्यविगर्हिताइति द्विजातयस्सवर्णासुजनयन्त्यव्रतांस्तुयान् तान्सावित्री परिभ्रष्टान्व्रात्यानितिविनिर्दिशेदितिचमनुः हीनाः जात्याकुलेनवा अपकृष्टाः श्रेणिप्रमुखाः अन्त्यजावर्द्धक्यादयः वर्द्धकीनापितोगोपआशापः कुम्भकारकः वणिक्किरातकायस्थ मालाकारकुटुम्बिनः वरटोमेदचाण्डालदासश्वपचगोलकाः एतेऽन्त्यजास्समाख्यातायेचान्येचगवाशनाः एषांसम्भाषणात्स्नानन्दर्शनादर्कवीक्षणमितिव्यासः तेभ्यः मुक्तिमोक्षम् दिशासिवितरसि तान्मुक्तसंसारबन्धनान्विदधासीत्यर्थः अनेनोक्तानौचित्यनिन्दया एतादृशाअपित्वत्सम्भक्षतामेत्यैवपरमपवित्रतामाधिगम्यमुक्ताभवन्तीत्यतस्त्वत्प्रभावोत्कर्ष शालिताङ्गोवर्णयेदितिस्तुतिस्सूचिता ॥ ६७ ॥ अथश्रीगङ्गायाअभ्यर्णनिवासासक्तिप्रौढिम्प्रार्थयंस्तांस्तौति मृदुलेति मृदुलाऽतिसुकुमारा मादृशातिदुःखितजनार्त्तिभरमसहमाने त्यर्थः हृदयभित्तिरन्तःकरणकुड्यम् भक्तजनचित्तलेखनाधारप्रदेशइतियावत् यस्यास्सा तत्सम्बोधनम् भित्तिस्त्रीकुड्यमित्यमरः प्रोल्लसन्तीपुण्यापवित्रा वृत्तिश्शरणागतजन

त्वयि सुरनदि दृष्टा याऽद्य दुर्नीतिरुच्चै रहह न भुवने सा क्वापि सत्यम्ब्रवीमि । पशुपतितपुलिन्दव्रात्यहीनान्त्यजेभ्यो दिशसि यदपरीक्ष्य प्रेक्षणादेव मुक्तिम् ॥ ६७ ॥ मृदुलहृदयभित्ते प्रोल्लसत्पुण्यवृत्ते त्वदमलजलवित्ते मामके देवि चित्ते । विहितकलुषभङ्गे जातुचिन्नास्तु गङ्गे कथमपि समुपेक्षा सन्निधे स्सन्निधे स्ते ॥ ६८ ॥

शुभोदयविधायिमनस्स्फुरणंयस्याः यद्वा प्रोल्लसदतिशोभनम् पुण्यस्पावनम् वृत्तन्तत्पुराणप्रतिद्धस्स्वजनोद्धारलक्षणोवृत्तान्तोयस्यास्सा तत्सम्बोधनम् विहितस्सम्पादितः कलुषाणांनिजजनपापानाम् भङ्गोभञ्जनम् विध्वंसइतियावत् ययासातत्सम्बोधनम् हेगङ्गेदेवि अत्रसम्बुद्धिपञ्चकेनश्रीपञ्चवक्त्रप्रियत्वंसूचितम् तव अमलन्दोषमलवर्जितम् यज्जलम् तदेव वित्तन्धनंस्वासक्तिस्थानंयस्यतास्मिन् मामकेमत्सम्बन्धिनि चित्तेहृदि जातुचित्कदाचिदपि अन्तरायपरम्परासमागमावसरेऽपीत्यर्थः कथमपिकेनापिप्रकारेण लाभालाभप्रतिष्ठाऽप्रतिष्ठादिसम्भावनावशेनापीत्यर्थः सन्निधेरुत्तमशङ्खादिनिधिहेतुत्वात्तत्स्वरूपस्य सतांसर्ववस्तुजातोत्कर्षशालिनान्धर्म्मार्थाद्यलभ्यलाभाम् निधीयतेऽस्मिन्नि तिनिधिराश्रयस्तस्यवा तेतव सन्निधेस्सन्निकर्षणस्यसामीप्यस्येत्यर्थः सन्निधिस्सान्निकर्षणमित्यमरः समुपेक्षापरित्यागबुद्धिः नास्तुनभवतु अनेनसर्वार्थसिद्धिनिदानस्यश्रीगङ्गा ॥२०॥

निकटवासस्यनिखिलसुखसाधनसम्पत्तिसमुपरतसज्जनैकसर्वस्वत्वन्ध्वनितम् ॥ ६८ ॥ अथेतरतीर्थनिकराखर्चिपुरस्सरंश्रीगङ्गैकपरायणत्वप्रकाशकपटेनश्रीगङ्गांस्तौति सकलेति हेदेविगङ्गे नन्ववधारणे प्रश्नावधारणानुज्ञानुनयामन्त्रणेनान्वित्यमरः सकलधरणिजातमखिलभूमण्डलान्तर्वर्त्ति सुजातंस्वमहिम्नाऽतिसुन्दरम् तथाच भगवान्कालिदासः दिने पुगच्छत्सुनितान्तपीवरन्तदीयमानीलमुखंस्तनद्वयम् तिरश्चकारभ्रमरावलीढयोस्सुजातयोः पङ्कजकोशयोः श्रियमिति तदुपरिमल्लिनाथः सुजातयोस्सुन्दरयोरिति तीर्थजा-तम्पुण्यक्षेत्रौघः जातंव्यक्तौघजन्मसु क्लीवन्त्रिलिङ्ग मुत्पन्नइतिमेदिनी अद्यसम्प्रति त्वत्समागमावसरएव मयात्वदेकानुरक्तमनसा कृताविहिता सम्यक्समीचीना अचश्चले-त्यर्थः उपेक्षासम्बन्धमात्राऽरुचिविशेषः यस्य तत्तादृशम् जातमुत्पन्नम् सम्प्रतित्वय्येववद्धानुरागोऽस्म्यहमितिभावः अथकाकोक्त्यार्थंसमर्थयति हेसुरनदित्रिदशसरित् सर्वोत्कर्षद्योतिनीयंसम्बुद्धिः त्वयिभवत्यांसत्यांवर्त्तमानायाम् अत्रजगत्याम् कस्यत्वदतिरिक्तस्यतीर्थस्य आदरस्सत्कारोगौरवव्यवहारलक्षणः स्ताद्भवतु नकस्यापीतिभावः

सकलधरणिजात न्तीर्थजातं सुजात न्ननु कृतसमुपेक्ष न्देवि जात म्मयाऽद्य । त्वयि सुरनदि सत्यामत्र कस्यादरस्स्ता त्सति दिनकरबिम्बे का कथा दीपकानाम् ॥ ६९ ॥ तव विमलसमाख्यागानमात्रेण गङ्गे तदिह ननु लभन्ते मानवा वस्तु किञ्चित् । बहुभिरपि तपोभि श्चाथ सर्वस्वदानै र्न किल सकलतीर्थस्नानतो लभ्यते यत् ॥ ७० ॥

तदेवदृष्टान्तयति दिनकरबिम्बेमार्त्तण्डमण्डलेसति दीपकानान्दीप्तिकारकाणान्दीपानामल्पदीपज्वालानांवा काकथा कागणना नकापीत्यर्थः दीपकंवागलङ्कारेवाच्यवद्दीप्ति-कारकइतिमेदिनी अनेनश्रीगङ्गायास्सकलतीर्थमौलिमाणिक्यत्वन्ध्वनितम् ॥६९॥ अथश्रीगङ्गायानिखिलतपोदानतीर्थेभ्योऽधिक फलदातृत्ववर्णनव्याजेनतांस्तौति तवेति हेगङ्गे तव विमलानांस्वच्छानामखिलदोषमलापहारिकाणांवा समाख्यानाङ्गङ्गासुरधुनीत्रिपथगाभागीरथ्यित्यादीनांसमीचीनानांनाम्नाम् अथाह्वयः आख्याह्वेअभिधानञ्चनामधेयञ्च-नामचेत्यमरः गानमात्रेणकथमप्युच्चारणमात्रेणहेतुना इहास्मिँल्लोके मानवामनुष्याः तत्किञ्चिद्वाङ्मनसागोचरङ्किमपिवस्तु ननुलभन्तेप्राप्नुवन्त्येव यद्वस्तु बहुभिर्बहुलैरपि तपोभिःकायक्लेशसाध्यधर्मविशेषैः चकारादेवाद्यर्चनैरपि अथकिञ्च सर्वस्याखिलस्य स्वस्यात्मीयत्वेनमानसासाक्षिविषयस्य धनस्यपदार्थमात्रस्यवा दानैस्स्वस्वत्वनिवृत्त्यासु-

पात्रस्त्वापादनरूपैः अथच सकलतीर्थस्नानतस्त्वदितराखिलपुण्यक्षेत्रनिमज्जनात् स्नानपदमत्रदर्शनादेरुपलक्षणम् नलभ्यते किलेतिसम्भाव्यार्थे किलशब्दस्तुवार्त्तायांसम्भा व्यानुशयार्थयोरितिमेदिनी अनेनतपःप्रमुखपराङ्मुखत्वेनापि श्रीगङ्गानामोच्चारणपरायणानामपि कैवल्यलाभइतिध्वनितम् ॥ ७० ॥ अथहेतुचतुष्टयसम्पादितसर्वोत्कर्षसम्भृ तत्वप्रतिपादनेन श्रीगङ्गांस्तौति विधीति हेजननिगङ्गे विधिविहितसपर्याद्ब्रह्मदेवकृतार्हणात् पुजानमस्यापचितिस्सपर्याऽर्चाऽर्हणास्समाइत्यमरः विष्णुपादाद्बलिनिग्रहार्थधृत वामनावतारत्रिविक्रमनामधेयश्रीनारायणचरणात् सरन्तीनिर्गच्छन्ती वामनावतारे वलेर्बन्धनाय त्रिविक्रमयतोविष्णोःपादंवियतिसमवलोक्य निजकमण्डलुजलाभिषेकेण समर्चयितुन्तदुपरिकमण्डलुजलाङ्क्षिप्तवान्विधाता तदेवजलंसमर्चितवामनपादतस्सादरङ्कमण्डलावेवपुनर्दधार ततस्तंसमभ्यर्च्य कृततपसा भगीरथेनराजर्षिणा भक्तिसन्तुष्टीकृत श्रीमन्महादेवजटाजूटद्वारा कमण्डलुतोधरणीतलमानीतन्तत् कपिलमुनिकोपाग्निदग्धतत्पूर्वजसगरसुतनिकरसमुद्धारश्चकार गङ्गेतिपरमपावननामधेयताञ्चजगामेतिपौराणि

विधिविहितसपर्या द्विष्णुपादा त्सरन्ती त्रिपुरहरजटायां सन्ततं सञ्चरन्ती । तुहिनगिरितटान्ता न्मेदिनीमाव्रजन्ती
जननि विजयसे त्वं विष्टपम्पावयन्ती ॥ ७१ ॥ त्रिजगति तव कीर्त्ति र्भासमाना समाना त्रिदशसरिदनेकै र्द्धशोभते
देवि रूपैः । क्वचिदमरगजेन्द्रः क्वाप्यनन्तः फणीन्द्रः क्वचिदपि च सितांशुः कुत्रचित् क्षीरसिन्धुः ॥ ७२ ॥

कीङ्कथा मादायोक्तङ्कविना विष्णुपादात्सरन्तीति त्रिपुरहरजटायांश्रीमन्महादेवलग्नकचसमूहस्वरूपायाम् जटालग्नकचेमूलेइतिविश्वलोचनम् सन्ततमविरतम् सतते ऽनारता ऽश्रान्तसन्तता ऽविरता ऽनिशामित्यमरः सञ्चरन्तीसोल्लासंविहरन्ती तुहिनगिरितटान्ताद्गिरिराजहिमाद्रिसुरादिसंसेविनस्थलपार्श्वप्रदेशात् मेदिनीमुपत्यकादिक्रमेणभूमितलम् आव्रजन्तीसमागच्छन्ती विष्टपंसकलञ्जगत् अथोजगतीलोकोविष्टपम्भुवनञ्जगदित्यमरः पावयन्तीपवित्रीकुर्वाणा सती विजयसेसर्वोत्कर्षेणवर्त्तसे पावयन्तीतपत्रस्वार्थेणिच् अनेन स्मारिततत्तत्पुराणकथाप्रसङ्गप्रकाशितवैभवातिरेकमहिम्ना श्रीगङ्गायामलभ्यवस्तुत्वन्ध्वनितम् ॥ ७१ ॥ अथश्रीगङ्गायाःप्रकारविशेषेण निजकीर्त्तिशुभ्रितभुवनस्वन्द- र्शयंस्तांस्तौति त्रिजगतीति हेत्रिदशसरित् श्रीगङ्गेदेवि अनेकैर्बहुभिः रूपैः ऐरावताद्याकारैः रूपंस्वभावेसौन्दर्येनालोकेपशुवृन्दयोः ग्रन्थावृत्तौनाटकादावाकारश्लोकयोरपीति ॥२१॥

मेदिनो भासमानासदैकरसप्रकाशमाना समाना सदैवन्यूनाधिकभावशून्या यद्वा मानेन सर्वसत्करणीयतोत्थितया चित्तोन्नत्यासहवर्त्ततेसातथोक्ता यद्वा मानेनपरिमाणेन सहवर्त्तते इतिसमाना परिमिता सानभवतीति असमानाऽपरिमिता अकारप्रश्लेषेणायमर्थः यद्वा नास्ति समानस्सदृशोयस्यास्साऽसमाना अनुपमा प्रतिपक्षशून्यावा मानश्चित्तो न्नतौग्रहे क्लीवम्प्रमाणेप्रस्थादावितिमेदिनी तव कीर्त्तिर्य्यशः त्रिजगतिजगत्त्रये जगतिचतवेतिपाठे चकारःकिञ्चेत्यर्थे जगतिलोकइत्यर्थः शोभतेहृदयङ्गमतयाराजते कथमिति चेत्तथादर्शयति क्वचिदर्थात्स्वर्गलोके अमरगजेन्द्रऐरावतरूपेणपरिणता क्वापिपाताले अनन्तोऽनन्तनामकः फणीन्द्रस्सर्पराजः श्रीशेषः अवलम्बितशेषस्वरूपा क्वचिदपिचान्त रिक्षे सितांशुश्शुभ्रांशुः चन्द्ररूपताङ्गता कुत्रचित् अत्रक्वापिचेतिवापाठः भूलोके क्षीरसिन्धुदुग्धसमुद्रः क्षीरवारिधिविग्रहा नैतेऐरावतादयःकिन्तुतत्तद्रूपेणपरिणतातवकीर्त्ति रेवेतिभावः कीर्त्तेश्शुभ्रतया कविनयेवर्णनादिदन्निरूपणमित्यभिसन्धिः अनेनसर्वातिशायिनीतवकीर्त्तिरितिध्वनितम् ॥ ७२ ॥ अथस्वस्यानन्यगतिकत्वन्दर्शयन् श्रीगङ्गांस्तौति

हरिहरविधिमुख्या न्केचिदर्च्चन्ति रागा त्कतिचिदिह तपोभिः कुर्वते कायकार्श्यम् । विविधकृतिकलापा न्केऽपि कुर्वन्ति यज्ञा न्विबुधनदि विना त्वां नैव जाने ऽहमन्यत् ॥ ७३ ॥ शृणुभगवतिगङ्गेमामकंवाक्यमेतत्त्रिदिवसरिदयन्तेजृम्भते किंस्वभावः । पतितमपतितंवायन्नरंवाखरंवा तटगतमपरीक्ष्यस्वर्गयोग्यङ्करोषि ॥ ७४ ॥

हरीति हेविबुधनदि सकलकलाङ्कशमल२तरङ्गिणि देवैरप्याश्रितेइत्यर्थः श्रीगङ्गे केचित्केऽपिजनाः अरुचिग्रस्तमेतन् एवमग्रेऽपि हरिहरविधिमुख्यान्विष्णुरुद्रविधातृप्रभृतीन् रागा दनुरागात् भक्तिभावादित्यर्थः अर्च्चन्तिपूजयन्ति कतिचिज्जनाः इहास्मिँल्लोके तपोभिस्तपस्याभिः कायकार्श्यं शरीरकृशताम् कुर्वतेविदधति केऽपिकेचिदपिजनाः विविधा नानाविधावहुक्लेशप्रदाइतिभावः कृतिकलापाः कर्म्मकलापायेषुतान् यज्ञानग्निष्टोमराजसूयप्रमुखानध्वरान् कुर्वन्ति अनुतिष्ठन्ति यज्ञस्सवोऽध्वरोयागस्सप्ततन्तुर्म्मखः क्रतुरि त्यमरः अहन्तु त्वाम्भवतीम् विना अन्यादितरत् स्वोद्धारकर्त्तृ किमपिनजाने परिचिनोमि सेवेवेतिकिमुवक्तव्यम् अनेन त्वदेकपरायणोऽस्मीतिध्वनितम् ॥ ७३ ॥ अथश्रीगङ्गा याःपात्रापात्रविवेकवर्ज्जसर्वजन्तुसाधारणसद्गतिकर्त्तृत्वमुपालम्भकपटेनवर्णयस्तौति शृणुवति हेगङ्गेभगवति मामकंमत्सम्बन्धि एतदग्रेवक्ष्यमाणम् वाक्यंवचनम् शृणु

त्वंसमाकर्णय हेत्रिदिवसरित्स्वर्गनदि सम्बुद्धित्रयमेतत्प्रकृतोपालम्भपुंष्टिविधायीत्यनुसन्धेयम् अयंलोकप्रसिद्धोमद्बुद्धिस्थोवा वक्ष्यमाणः तेतव स्वभावोनिसर्गोऽवश्यकर्त्त-व्यताऽऽग्रहविशेषइतिभावः स्वरूपञ्चस्वभावश्चानिसर्गइत्यमरः किमितिप्रश्ने किमर्थंविजृम्भतेनिश्शङ्कतयावर्त्तते यद्वा किङ्कुत्सितोविजृम्भते नोचितमितिभावः किङ्कुत्सायां वितर्केचनिषेधप्रश्नयोरपीतिउभयत्रमेदिनी कुतइतिचेद्दतआह यद्यतः पतितम्पापिनम् समुद्धारायोग्यमित्यर्थः अपतितम्पुण्यवन्तंवा नरंमनुष्यम् खरङ्गर्दभंवा चक्रीवन्तस्तु वालेयारासभागर्दभाःखराइत्यमरः तटगतंनिजतीरसम्प्राप्तमात्रमेव अपरीक्ष्यैव अयम्प्राणीस्वर्गीयसुखोपभोगयोग्योऽस्तिनवेतिपरीक्षणमविधायैव स्वर्गयोग्यंशतक्रतुप्रभृति महानुभावनिवासार्हनाकवर्त्तमाननानादिव्यस्रक्चन्दनवनिताद्युपभोगसुखोचितम् करोषिविदधासि अनेन श्रीगङ्गायाः अचिन्तनीयमाहात्म्यसंवलितमहौदार्य्यशोभिलोकोत्तर वैभवशालित्वन्ध्वानितम् ॥ ७४ ॥ अथश्रीगङ्गायादर्शनमात्रादलौकिकम्फलमितिकथनद्वारातांस्तौति उदयतीति हेसुरधुनिनिर्झरतटिनिश्रीगङ्गे पुण्यैकराशेरतीवपुण्यकारित्वा-

उदयति हृदि बुद्धि र्यस्य पुण्यैकराशेः सुरधुनि तव दृष्टौ प्रस्फुरद्भाग्यभारैः ।
त्रिदिवपरिवृढो ऽथ न्तत्सपर्याकृते किं सुरदुरधिगमा नो संविधा स्सञ्चिनोति ॥ ७५ ॥

त्सुकृतसमूहरूपस्य यस्यप्राणिनःपापिनस्तुत्वद्दर्शनवाञ्छैवदुर्लभेतिभावःहृद्यन्तःकरणे प्रस्फुरद्भाग्यभारैः स्फुदितप्राक्तनसुकर्म्मपुण्यफलशुभदैवसमूहैःकरणैःनत्वेकेनकेनाचिद्भाग्ये नेत्यर्थः तव दृष्टौदर्शने दर्शनायेत्यर्थः चर्मणिद्वीपिनंहन्तीतिवन्निमित्तार्थेसप्तमी बुद्धिर्म्मनोवृत्तिविशेषः उदयति उद्देति प्रस्फुरतीतियावत् उदयतियदिभानुःपश्चिमेदिग्विभागे इत्यादिवदत्रापि अनुदात्तेत्वनिमित्तिकात्मनेपदस्यानित्यत्वात्परस्मैपदम् तस्यप्राणिनः सपर्य्याकृतेपूजाकरणाय कृतेइत्यव्ययञ्चतुर्थीप्रतिरूपकम् अयम्प्रसिद्धः त्रिदिवपरिवृढः स्वर्गाधिपतिश्शक्रः सुरदुराधिगमादेवदुर्लभाः सम्यग्विधीयते क्रियते सुखाद्यनुभवःआभिरितिसंविधाःपूजासामग्र्यःताः कर्म आतश्चोपसर्गे इतिकप्रत्ययः अकर्त्तरिचकारके सञ्ज्ञायामितिकर्माद्यर्थत्वम् तथाच रघुवंशेकालिदासः सत्यामपितपस्सिद्धौनियमापेक्षयामुनिः कल्पवित्कल्पयामासवन्यामेवास्यसंविधामिति नोसञ्चिनोतिकिम् स्वभृत्यैरि तरस्मादपिदेवलोकादानीय नोसम्पादयतिकिम् अपितुचिनोत्येवेतिभावः अनेन श्रीगङ्गायादर्शनमात्रेच्छामात्रस्य यदीदृशम्फलम् तर्हि साक्षाद्दर्शनस्यतु तत्किमितिकोजाना

तीतिध्वनितम् ॥ ७५ ॥ अथाद्भुतार्थरचनयाश्रीगङ्गांस्तौति सुरतटिनीति हेसुरतटिनिश्रीगङ्गे शर्वस्यश्रीमहादेवस्य यत्सौभाग्यंसुभगत्वम् तद्वत्यान्तदाश्रयभूतायाम् सर्वोत्कर्षतानिदानीभूतायामित्यर्थः यद्वा शर्वेणसौभाग्यवत्याम् तदेकनाथायामित्यर्थः भवत्यान्त्वयिविषये जिताः तेषामपिबुद्ध्यविषयत्वात् परास्ताः सुमतयोविवेकिनोऽपियेनतत् अथच पवित्रम्पावनम् नतुग्लानिजनकम् यत् चित्रमद्भुतम् चित्रङ्केतिलकेऽद्भुते आलेख्येकर्बुरे इतिहेमचन्द्रः मया अदर्शिदृष्टम् शास्त्रदृष्ट्याऽवगतमितिभावः किलेत्यैतिह्येऽवधारणेवा तच्चित्रम् इतरस्मिंस्त्वत्तोऽन्यस्मिन् विष्णुश्रीशङ्करादावित्यर्थः नास्तीतिशेषः नाऽदर्शीतिवा कथमितिचेत्तदाकर्णय यद्यतः मुरारेःश्रीवामनावतारस्यविष्णोः पदेन स्वोत्पत्तिस्थानेनचरणेन विहीनापि तत्परित्यज्यभूमावागताऽपि तच्छून्यापीतियावत् अहहेत्यद्भुते अहहेत्यद्भुतेखेदइत्यमरः तत् मुरारेःपदम् निजेभ्यश्शरणागतेभ्योभक्तेभ्यः स्फुटंयथास्यात्तथा नतुगुप्तमितिभावः ददासिवितरासि यद्वस्तु यत्याश्वेनविद्यते तद्वस्तु सकथंस्वेभ्योददात्येवेत्यद्भुतंविरोधञ्जनयाति तन्मुरारेःपदंस्थानंवैकुण्ठंसारूप्याख्यं

सुरतटिनि भवत्यां शर्वसौभागवत्या जितसुमति पवित्रं यन्मयादर्शि चित्रम् । न किल तदितरस्मिन्न न्मुरारेः पदेन
स्फुटमहह विहीना त न्निजेभ्यो ददासि ॥७६॥ तरुणधवलरश्मिप्रस्फुरत्पाण्डरांशुव्रजविजयधुरीणप्रोल्लसत्सत्तरङ्गे ।
वरविभवविहङ्गे ऽनङ्गविद्वेषिसङ्गे कुरु मम भवभङ्गे शेमुषी न्देवि गङ्गे ॥ ७७ ॥

वस्तुवेत्यर्थेनतुविरोधाभावः अनेनात्राद्भुतार्थप्रदर्शनाल्लोकोत्तराश्चर्यास्पदत्वंश्रीगङ्गायास्सूचितम् ॥ ७६ ॥ अथश्रीगङ्गायाश्चतुर्वर्गप्रदानवदान्यत्वंसम्भाव्य वक्तुमशक्यंसांसारिकन्दुःखमनुसन्धाय तन्निवृत्तिम्प्रार्थयंस्तांस्तौति तरुणेति तरुणःपार्वणोयोधवलरश्मिश्चन्द्रमाः तस्य प्रस्फुरन्विलसन्यः पाण्डरश्शुभ्रः अंशुव्रजःकिरणनिकरः तस्य विजये अधस्तात्करणे धुरीणाधुरन्धराः अतिसमर्थाइत्यर्थः अतएव प्रोल्लसन्तस्समुल्लासम्प्राप्नुवन्त स्सन्तस्सर्वगुणसम्पन्नाः दोषलवेनाप्यस्पृष्टाइत्यर्थः तरङ्गाऊर्मयोयस्यास्सा तत्सम्बोधनम् वरविभवामहैश्वर्य्या विहङ्गाश्शुकसारिकादयःपक्षिणोययायस्यायस्यांवासा तत्सम्बोधनम् अनङ्गविद्वेषिणः कामारेःश्रीशङ्करस्य सङ्गस्समागमोयस्याययावासा तत्सम्बोधनम् हेदेविगङ्गे मम भवभङ्गेसंसारदुःखविध्वंसे शेमुषीम्बुद्धिम् कुरु विधेहि ममभक्तिं कुर्वित्यर्थः अनेनश्रीगङ्गायाः आत्यन्तिकदुःखलयाय सर्वथोपास्यत्वंसूचितम् ॥७७॥

अथभङ्ग्यन्तरेणोपालम्भविधया श्रीगङ्गायाः कैवल्यप्रदात्रीत्वम्प्रतिपादयंस्तांस्तौति कतिचनेति हेसुरसिन्धोदेवनदि श्रीगङ्गे सिन्धुर्वमथुर्देशाब्धिनदेनासरितिस्त्रियामितिमेदिनी
कतिचनकेऽपि पुण्यवन्तस्त्वत्सेवनादर्जितसुकृतभाराः प्राणिनः त्वयिप्रवाहरूपायाम् परिहृतदेहास्सन्त्यक्तकलेवरास्सन्तः स्वर्गगेहाअमरलोकवासिनोभवन्तिसम्पद्यन्ते पुनः
हेशिवबन्धोहेश्रीमन्महादेवप्रिये कतिचन केऽपि एतेप्राणिनः त्वयिपरिहृतदेहास्सन्तः श्रुतिपथविगताख्याः क्वचिदप्यश्रूयमाणनामानः अथच निर्निकेताःक्वचिदप्यनधिगत
निवासस्थानाः जायन्तेभवन्ति एतत्किमितिप्रश्ने त्वम्ब्रूहिकथय त्वयैनैतादृग्युक्तमितिसोपालम्भोक्तिः वस्तुतस्तु नामधामादिशून्यानिर्वाणपदप्राप्त्यर्थावगमेन सुकृततारतम्यव
शाद्योगमोक्षप्रदात्रीत्वंश्रीगङ्गायांसूचितम् ॥ ७८ ॥ अथापि भङ्ग्यन्तरेणसोपालम्भोक्त्या श्रीगङ्गायाम् संसारनिवर्त्तकत्वन्दर्शयंस्तांस्तौति त्रिदिवेति हेत्रिदिवधुनि नाकनदि
मुनीन्द्रैर्मुनिश्रेष्ठैर्नारदादिभिः मानवेन्द्रैर्मनुष्यप्रवरैर्भगीरथादिभिः सुरेन्द्रैः पाकशासनादिभिः परिणुतास्संस्तुताः गुणपुञ्जाद्दयालुत्वशरण्यत्ववदान्यत्वादिकाऽसाधारण

कतिचन सुरसिन्धो प्राणिनः पुण्यवन्त स्त्वयि परिहृतदेहा स्स्वर्गगेहा भवन्ति । कतिचन शिवबन्धो ब्रूहि जायन्त
एते श्रुतिपथविगताख्या निर्निकेताः किमेतत् ॥ ७८ ॥ त्रिदिवधुनि मुनीन्द्रै र्मानवेन्द्रै स्सुरेन्द्रैः परिणुतगुणपुञ्जे
मानसाकर्षिकुञ्जे । निजशिरसि भवेन प्रोल्लसद्वैभवेन प्रचुररुचि धृता हो त्व म्भवं हंसि किन्नु ॥ ७९ ॥

गुणगणायस्यांयस्यावासातत्सम्बोधनम् मानसाकर्षिणोद्रष्टृजनमनोहारिणः कुञ्जालताप्रतानप्रच्छन्नप्रदेशायस्याः यत्समीपवर्त्तिनइत्यर्थः सातत्सम्बोधनम् हेश्रीगङ्गे प्रोल्लसद्वै
भवेनसर्वोन्नतैश्वर्येण भवेनश्रीचन्द्रशेखरेणेशेन भवःक्षेमेशसंसारसत्तायाम्प्राप्तिजन्मनोरितिमेदिनी प्रचुररुचिबहुतरसत्काराभिलाषंयथास्यात्तथा निजशिरसिनिजोत्तमाङ्गे
धृतासादरंसंस्थापिता त्वम् नुवितर्के नुवितर्कापमानयोः विकल्पानुनयातीतेप्रश्नेहेत्वपदेशयोरितिमेदिनी भवम् किम् हंसिमारयासि नोचितमितिसोपालम्भोक्तिः भवंसंसारम्
हंसिनिवर्त्तयसि इतिपरमार्थेतु तत्परिहारः किमितिकुत्सार्थेवा अत्रभवविशेषणम् अनेन सगौरवातिशयम् श्रीगङ्गायाः विचित्रम् माहात्म्यंसूचितम् ॥ ७९ ॥ अथवस्तुविनि- ॥२३॥
र्मयविचाराकौशलवर्णनव्याजेनश्रीगङ्गायाविलक्षणशक्तिमत्त्वन्दर्शयंस्तांस्तौति वितरतीति हेदेविगङ्गे यश्शरीरीदेही नृपशुकीटपतङ्गादिः त्रिभुवनेत्रिभुवनस्यवा भगवत्यैमहैश्वर्य

शालिन्यैपूज्यायैवा भवत्यैंतुभ्यम् सर्वैत्रतं दुष्टोघ्राणेन्द्रियव्यथाजनकः गन्धआमोदोयेषान्तेदुर्ग्गन्धाः मज्जापूयश्लेश्मशोणितादयः तेषाम् गेहंनिवासस्थानम् अतीवापवित्र मित्यर्थः निजदेहमात्मीयशरीरम् प्राणान्तावस्थायाम् वितरतिददाति समर्प्पयतीतियावत् गन्धस्सम्बन्धलेशयोः गन्धकामोदगर्वेष्विति हेमचन्द्रः सर्वदुर्ग्गन्धिगेहमितिपाठेतु बहुव्रीहौनिष्पन्ने इत्वमतीवदुर्लभम् तथापिकर्मधारयात् इनौमत्वर्थीयेकृते तत्सुसाधनम् तत्रापि नकर्म्मधारयान्मत्वर्थीयोबहुव्रीहिश्चेत्तदर्थप्रतिपत्तिकरइतिवाक्यमुपन्यस्यतां विदुषांविरुद्धपक्षपोषकेण प्रत्ययस्थादितिसूत्रस्थेनासुब्वतइतिभाष्यप्रयोगेणाभीष्टंसाध्यते इत्याद्यनुसन्धेयम् तस्मैवितीर्णतथोक्तदेहाभिमानिनेशरीरिणेजीवाय शशिमृगवृषनाग व्याघ्रचर्म्मादिरम्यास्थालेन्दुकृष्णहरिणमहोक्षशेषनागशार्दूलकृत्तिशोभनीयाम् मृगेकुरङ्गवातायुहरिणाजिनयोनयइति उक्षाभद्रोबलीवर्दऋषभोवृषभोवृषः अनड्वान्सौरभेयोगौ रिति शार्दूलद्वीपिनौव्याघ्रे इति अजिनञ्चर्मकृत्तिस्त्रीतिचामरः शाङ्करींश्रीशङ्करसम्बन्धिनीम् मूर्त्तिङ्कायम् मूर्त्तिःकायकाठिन्ययोरितिमेदिनी दिशसित्वन्ददासि इत्येतत्किम्

वितरति निजदेहं सर्वदुर्गन्धगेह न्त्रिभुवनभगवत्यै य श्शरीरि भवत्यै । शशिमृगवृषनागव्याघ्रचर्म्मादिरम्यान्दिशसि
किमिति तस्मै शाङ्करी न्देवि मूर्त्तिम् ॥ ८० ॥ अगणितजनिजातप्रोत्कटैनोनिवृत्त्यै सुरनदि यदि भूमावाव्रजिष्यो न
च त्वम् । अतिपतितजनौघव्याप्त्यकम्याऽप्यगम्या कथमियमभविष्य त्सर्वसौभाग्यरम्या ॥ ८१ ॥

किमितिप्रश्ने एतादृशोविनिमयःकेनक्रियते विचारयमनसि क्वगतोविवेकस्तवेत्युपालम्भः अनेन स्वजलेसन्त्यक्तशरीरम्प्राणिमात्रंश्रीशङ्करम् विदधासि अतस्तेऽतीवाचिन्तनीयं महत्वमितिसूचितम् ॥ ८० ॥ अथश्रीगङ्गायांनिखिलभूमण्डलसौभाग्यकारणतांवर्णयंस्तांस्तौति अगणितेति हेसुरनदिसुपर्वसरित् श्रीगङ्गे चकारःपूर्वस्मात्समुच्चये यदिचेत् अगणिताभिरगणितासुवा जनिभिर्ज्जन्माभिः जनिषुजन्मसुवा जनुर्ज्जननजन्मानिजनिरुत्पत्तिरुद्भवइत्यमरः जातानिसमुत्पन्नानि यानि प्रोत्कटानिभयङ्कराणि श्रवणमात्रात् हृदय कम्पजनकानि एनांसित्वत्पराङ्मुखजनपापानि तेषाम् निवृत्त्यैः स्वकीयसन्निधिमात्रेणसमुच्छेदाय भूमौपृथिव्याम् त्वम् न आव्रजिष्यः न आगमिष्यः तर्हि अतिपतितजनानाम् ओघेनसमुदायेन ओघस्यसमुदायस्यया याऽप्याप्तिस्सर्वतोव्याप्त्यवर्तमानता तथा अकम्प्याऽकमनीयाऽनाकाङ्क्षणीयावा अतएव अगम्याऽनाश्रयणीया प्रवेशाऽयोग्यावा अपि

इयम्भूमिः सर्वसौभाग्यरम्यापारिपूर्णसुभगतारमणीया सर्वथैवमानसासक्तिविषयइत्यर्थः कथमभविष्यत् नकथमपीत्यर्थः लिङ्निमित्तेलङ्क्रियाऽतिपत्ताविति लङ् कलौबहुल तरदुरितविधानैकतानमानसजनव्याप्तिदोषेण सर्वथैवपरिहरणीयताऽऽस्पदमप्ययम्भूलेकः विविधदुरुद्धरवृजिनभरनिवारणोद्धुरभवदीयागमनप्रसादेनातिहृदयङ्गमतांसमा गतइतिभावः अनेन इदम्भूमण्डलम् सर्वैश्वर्याभगवत्याभवत्यैवमण्डितामितिसूचितम् ॥८१॥ अथभङ्ग्यन्तरेणश्रीगङ्गायाः पापनिवारणतत्परत्वम्प्रतिपादयन्तांस्तौति यदवधीति हेमातर्ज्जनानि सर्वथैवसदयहृदये यदवधियस्मात्समयादारभ्य आत्मसेवापराणांनिजस्नानपानाद्यर्चनैकतानचेतसाञ्जनानाम् सर्वपापापहृत्यैनिखिलकलुषनिराकरणार्थम् तव दृढपरिकरताऽनुन्मोचनीयाच्छेद्यगात्रिकाबन्धता परिपक्वविवेकतावा अभूदभवत् भवेत्परिकरस्सङ्घेपर्यङ्कपरिवारयोः प्रगाढगात्रिकाबन्धेसमाचारविवेकयोरितिमेदिनिकर वचनादत्रयद्यपि परिकरशब्दस्यैवदृढगात्रिकाबन्धवाचित्वात् दृढशब्दस्यव्यर्थताऽऽपत्तिःतथापि अत्यर्थकत्वेनविवेकांशोपयोगित्वेनवा सार्थक्यमित्यनुसन्धेयम् तदवधि तस्मा

यदवधि तव मात स्सर्वपापापहृत्यै दृढपरिकरताऽभूदात्मसेवापराणाम् । तदवधि रविसूनोः पत्तन म्पाशबद्धाः करुणमतिरुदन्तः के गता स्सेवकास्ते ॥ ८२ ॥ स्वचरितदुरिताशुध्वंससामर्थ्यवत्या त्वृतकलुषविशेषा न्दूरदेशा न्भवत्या । खरकरसुतदूता दण्डपाशादिहस्ताः कथय कथमयन्ते पापिनो ऽन्विष्य धर्त्तुम् ॥ ८३ ॥

त्समयादारभ्य पाशबद्धाः करकटिकण्ठपादादौयमदूतैः पाशसन्दानिताः अतएव करुणङ्करुणरसप्रधानम् यथास्यात्तथा अतिशयेनरुदन्तः उच्चैस्स्वरेणरोदनङ्कुर्वन्तस्सन्तः के तेतव सेवकाःपूजकाः त्वयिस्नानादिकुर्वाणाइत्यर्थः रविसूनोस्सूर्यात्मजस्ययमस्य पत्तनंनगरीम् गताःप्राप्ताः नानाविधनरकदुःखमन्वभवन्नित्यर्थः नकेपीतिकाकुः धर्मराजःपितृ पतिस्समवर्त्तीपरेतराट् कृतान्तोयमुनाभ्राताशमनोयमराड्यम.कालोदण्डधरःश्राद्धदेवोवैवस्वतोऽन्तकइत्यमरःपुरम्पुरीपूर्नगरीपत्तनम्पुटभेदनमितिधनञ्जयःअनेन श्रीगङ्गासेवि भिःपुण्यवद्भिर्ज्जनैः स्वप्नेऽपिनिरयदुःखानुभवसम्भावनाऽपिनविधेयेतिसूचितम् ॥ ८२ ॥ अथश्रीगङ्गायामाहात्म्यकथाप्रसङ्गप्रभावातिशयवर्णनद्वारातांस्तौति स्वचरितेति मात रितिपूर्वतोऽनुवर्त्तनीयम् हेमातःश्रीगङ्गे स्वचरितैरतीवदुर्द्धरदुरितन्यक्कारयोगिजनदुर्ल्लभसद्गतिसत्वरप्रापणादिस्वरूपतत्तत्पुराणेतिहासप्रसिद्धपौराणिकजनकथितात्मीयवृत्तैः ॥२४॥

दुरितानान्तद्देशीयप्राणिसम्पादितानाम्पापानाम् आशु तच्छ्रवणसमकालमेव ध्वंसस्समुच्छेदः तत्रयत्सामर्थ्यंशक्तिमत्त्वम् तदस्यामस्यावाऽस्तीतिसातथोक्ता तया भवत्या त्वया हृतकलुशविशेषान्निवारितविशिष्टपापात् दूरदेशान् त्वत्प्रवाहतोविप्रकृष्टान्देशान् दण्डपाशादयोहस्तेषुषेषान्तेतथाभूतास्सन्तः आदिना गदातोमरकुन्तशक्तिखड्गच्छुरिकादिग्रहः खरकरस्योष्णरश्मेः श्रीमार्त्तण्डस्य सुतस्सूनुर्यमः तस्य दूताः यूयंयमेनाहूताइतिसन्दिश्यतत्क्षणमेव पाशादिनानिबध्य सहैवनेतारः किङ्कराः अन्विष्येतस्ततोऽन्वेषणङ्कृत्वा पापिनस्तत्तद्देशवार्त्तिनोदुरितकारिणोजनान् धर्त्तुङ्गृहीतुम् कथम् अयन्तेकथङ्गच्छन्ति इतित्वङ्कथयवद व्यर्थमेव तदानयनाय तत्र तेषाम् गमनमितिभावः अनेन यस्मिन्देशेश्रीगङ्गायाः अत्यन्तपवित्राः अद्भुतार्थाः कथाप्रसङ्गाः जनैस्सादरंश्रूयन्ते तद्देशवासिनोऽपिजनाः यमराजशासनाविरहिताः साक्षात्त्वत्सेवासावधानहृदयास्तथाभूता भवन्तीतिकिमुवक्तव्यमितिसूचितम् ॥ ८३ ॥ अथश्रीगङ्गायाःप्रसादवैभवतोजनानामूर्द्ध्वगतिंवर्णयंस्तांस्तौति द्युनदीति हेद्युनदिखस्तरङ्गिणिश्रीगङ्गे प्राक्पूर्वस्मिन्समयेत्वदा

द्युनदि वियति यत्र प्रागदर्शि क्वचिन्नो सविबुधसुवधूटीदिव्यगानं विमानम् ।

दरमुरजविपञ्चीदुन्दुभिध्वानरम्यैः किमिति नतादिदानी न्दृश्यते सङ्कुल न्तैः ॥ ८४ ॥

गमनात्पूर्वमित्यर्थः यत्र वियतिव्योम्नि क्वचिदपिप्रदेशे विबुधसुवधूटीनांसुरवरयुवतीनाम् रम्भोर्वशीप्रमुखानामप्सरसामित्यर्थः दिव्यगानन्दिव्यगीतम् तेनसहवर्त्ततेतत्तथोक्तम् विमानमेकमपिव्योमयानम् नो अदर्शिनदृष्टम् गीतङ्गानमिमेसमेइति व्योमयानंविमानोऽस्त्रीत्युभयत्राप्यमरः तद्वियत् इदानीमस्मिन्समये दरमुरजविपञ्चीदुन्दुभिध्वानरम्यैःदरशङ्खमृदङ्गवीणाभेरीशब्दरमणीयैः तैर्बहुभिर्विमानैः सङ्कुलङ्क्लिष्टंव्याप्तन्निरन्तरालमितियावत् सत् नदृश्यते नैवावलोक्यते किमपीतिशेषः इत्येतत्किम् किङ्कारणमत्रेति वदेत्यर्थः तथाचभागवतेदशमस्कन्धेसप्ततितमेऽध्याये मृदङ्गवीणामुरजवेणुतालदरस्वनैः ननृतुर्जगुस्तुष्टुवुश्चसूतमागधवन्दिनइति बहुपरिश्रीधरस्वामिनः दरश्शङ्खइति अथच तत्रैव षष्ठेस्कन्धेऽष्टमेऽध्याये हरिर्विदध्यान्ममसर्वरक्षांन्यस्ताङ्घ्रिपद्मः पतगेन्द्रपृष्ठे दरारिचर्मासिगदेषुचापपाशान्दधानोऽष्टगुणोऽष्टबाहुः त्वंयातुधानप्रमथप्रेतमातृपिशाचविप्रग्रहघोरदृष्टीन् दरेन्द्रविद्रावयकृष्णपूरितोभीमस्वनोऽरेर्हृदयानिकम्पयन्निति मृदङ्गामुरजाइति वीणातुवल्लकी विपञ्चीति भेरीस्त्रीदुन्दुभिःपुमानितिचामरः अनेनश्री

गङ्गायास्स्नानादिविधानजनितपुण्यप्रभावात्प्राणिभिः स्वर्गादिषुविमानैर्गम्यतेइतिसूचितम् ॥८४॥ अथच संशुद्धिकारणकृच्छ्रादिव्रतसर्वतीर्थोपासनाऽत्यरुचिकथनव्याजेनात्म नस्तदेकपरायणत्वम्प्रतिपादयन् श्रीगङ्गांस्तौति प्रविहितेति हेअमरधुनिदेवनदिश्रीगङ्गे प्रविहितानिसाधनावस्थायाङ्कृतानि बह्वानिबहुलानि कृच्छ्राणिकष्टानियैः तानितथोक्ता नितैः कारणातुयातनातीव्रवेदना पीडाबाधाव्यथादुःखमामनस्यम्प्रसूतिजम् स्यात्कष्टङ्कृच्छ्रमाभीलमित्यमरः कृच्छ्रैस्सान्तपनादिभिर्व्रतविशेषैः कृच्छ्रं सान्तपनादिकमित्यमरः कृच्छ्रमाख्यातमाभीलेपापसान्तपनादिनोरितिमेदिनी तत्स्वरूपन्त्वाह एकभक्तैश्चनक्तैश्चतथैवाऽयाचितैरपि उपवासैश्चतुर्भिस्तुकृच्छ्रंषोडसभिर्दिनैः एकभक्तेननक्तेनतथैवाया चितेनच उपवासेनचैकेनपादकृच्छ्रम्प्रकीर्त्तितम् द्वाभ्यांद्विपादकृच्छ्रंस्यात्त्रैगुण्येनात्रिपादकम् षोडसदिवसैर्यत्तुपूर्णङ्कृच्छ्रम्प्रकीर्त्तितामितिस्मृतिसारेपराशरः बहुवचनेनसान्त पनमहासान्तपनपर्णकृच्छ्रतप्तकृच्छ्रादीनाम्पादकृच्छ्रादीनांवासङ्ग्रहः इहास्मिँल्लोके मम किम् तर्हि प्रयोजनमितिशेषः अस्तिविद्यते नकिमपीत्यर्थः एवमुत्तरत्रापि पुनर्भूयः वराकैः

प्रविहितबहुकृच्छ्रैःकिंममास्तीहकृच्छ्रैरमरधुनिवराकैःकिम्पुनर्म्मेपराकैः ।
शिववितरणधन्यैर्देवितीर्थैःकिमन्यैःप्रभवसियदिलोकेत्वंहताऽशेषशोके ॥ ८५ ॥

इशोचनीयैरतितुच्छैरित्यर्थः वराकस्सङ्करेपुंसिशोचनीयेऽभिधेयवदितिमेदिनी पराकैरेतन्नामकैर्व्रतविशेषैः पराकस्तुव्रतेखड्गेइतिमेदिनी द्वादशाहोपवासेनपराकःपरिकी- र्त्तितइतियाज्ञवल्क्यः मेमम तर्हि किम्प्रयोजनमस्ति नकिमपीत्यर्थः बहुवचनेनचात्रचान्द्रायणादिग्रहः हेदेविप्रकाशस्वभावेश्रीगङ्गे शिववितरणेननिजशरणगजनकल्याणदानेन धन्यैःपुन्यवद्भिः पावनैरित्यर्थः धन्याधान्यामलक्योस्स्याद्धन्यस्पुण्यवतिप्रिष्विातिमेदिनी अन्यैस्त्वत्तोभिन्नैः तीर्थैःप्रभासपुष्करादिभिः क्षेत्रैः मेमम तर्हि किम्प्रयोजनमस्ति नकिमपीत्यर्थः हेहताशेषशोके दूरीकृताखिलनिजजनदौर्मनस्ये लोकेऽस्मिन्भुवने लोकोजनेपिभुवनइतिमेदिनी यदिचेत् त्वम् प्रभवासि तत्तत्कर्त्तव्यशुद्ध्यादिकर्म्मविधानेप्रभु रसि समर्थतरासीतियावत् अनेनसर्वव्रततीर्थानुष्ठानार्चाभ्योऽधिकतरमाहात्म्यशालित्वंश्रीगङ्गायास्सूचितम् ॥ ८५ ॥ अथमनोऽभिलापंसम्प्रार्थयन् निखिलवाञ्छितप्रदान धुरीणायांस्वमहिमवैभववर्द्धनप्रवीणायांसम्पादितशरणगजनसांसारिकदुःखभङ्गायाम् श्रीगङ्गायाम् भक्तीलतायन्दर्शयति त्रिदिवनदीति हेत्रिदिवनदि स्वर्गनदि श्रीगङ्गे

मदीयम्मामकम् मानसञ्चेतः चित्तन्तुचेतोहृदयंस्वान्तंहृन्मानसंमनइत्यमरः इदंमद्बुद्धिस्थम् किञ्चित् वाञ्छतिसमभिलषति चपुनः यदिचेत् भवदीयंमानसम् किंवाञ्छति इतीत्थम् मत्तोमाम् सार्वविभक्तिकस्तसिः पृच्छसिपृच्छांविदधासि तर्हि यत्तदोर्नित्यसम्बन्धइतिन्यायात्तर्हीत्यस्याध्याहारः त्वम् शृणुष्वसमाकर्णय अकर्म्मकाच्चेतिशृणोते रात्मनेपदम् तदेव कथयति अभ्यन्तराद्बहिः वाह्यादभ्यन्तरम् सरन्तिचलन्ति येतेषाम् असूनाम्प्राणानाम् पुंसिभूम्न्यसवःप्राणाश्चैवमित्यमरः योविशेषेण गमोगमनंविनाशः वहिर्निर्गत्यपुनर्न्नान्तःप्रवेशइतियावत् तस्मादर्वाक् पूर्वमेव यावदहम् जीवामीत्यर्थः त्वद्वियोगोऽतीवदुष्कृतसम्पत्तिसूचकस्त्वद्विरहः नाऽस्तुनभवतु यावज्जीवन्त्वन्निकटेमम निवासोभवत्वित्यर्थः चपुनः असूनाम्प्रयाणेसति पञ्चत्वेसतीत्यर्थः अर्थान्ममेत्यध्याहारः एतदित्यङ्गुल्यानिर्देशः मदीयंवपुश्शरीरम् अथकलेवरम् गात्रंवपुस्संहननंशरीरं वर्ष्मविग्रहः कायोदेहःक्लीवपुंसोस्स्त्रियांमूर्त्तिस्तनुस्तनूरित्यमरः त्वयिप्रवाहस्वरूपायाम् लुठतुपरिवर्त्तनंविदधातु अनेन श्रीगङ्गानिकटनिवासस्यसर्वसारत्वंसूचितम् ॥ ८६ ॥

त्रिदिवनदि मदीयं मानसं वाञ्छतीद ङ्किमिति च यदि मत्तः पृच्छसि त्वं शृणुष्व सरदसुविगमार्वागस्तु न त्वद्वियोगो लुठतु च वपुरेतत्त्वय्यसूनाम्प्रयाणे ॥ ८६ ॥ शृणु शृणु मम गङ्गे प्रार्थनावाक्यमेतत् कुरु कुरु मयि मात स्सानु-कम्पं मनस्त्वम् । मनसि मनसिजार्त्ते र्म्मे निधेहि प्रशान्तिं वितर वितर मह्यं मङ्क्षु कैवल्यमुक्तिम् ॥ ८७ ॥

अथस्वाभिलीपतत्रयम्प्रार्थयते शृण्विति हेगङ्गे मम एतद्वक्ष्यमाणम् प्रार्थनावाक्यंयाञ्चाप्रवणानुनयपदावलीम् शृणुशृणु नित्यम्पुनःपुनर्वाऽत्रधेहि तत्किमित्यपेक्षायामाह हे मातर्ज्जननि मयिमद्विषये स्वमात्मीयम् स्वस्स्यात्पुंस्यात्मनिज्ञातौ त्रिष्वात्मीयेधनेऽस्त्रियामितिमेदिनी मनश्चित्तम् सानुकम्पंसदयम् कारुण्यङ्करुणाघृणा कृपादयानुकम्पास्या दनुक्रोशोऽपीत्यमरः कुरुकुरु नित्यंविधेहि अन्यथा कथंममनोऽभिलषितसिद्धिरितिभावः किञ्च मेमम मनसिमानसे मनसिजार्त्तेःकामपीडायाः अर्त्तिःपीडाधनुष्कोट्योरि त्यमरः त्वम् शान्तिमुपशमम् निधेहिसंस्थापय विधेहीतिपाठेतु कुर्वित्यर्थः त्वत्प्रसादात्संसारतरुमूलत्रिभुवनविजयिमदनविकारदुःखितम्मन्मनोनभवत्वित्यर्थः किञ्च मह्यम् मङ्क्षु झटिति जन्मान्तरप्रदानकुशलनानाविधकुकर्मविधा [illegible] कैवल्यमुक्तिमौपनिषदज्ञानजन्यम्पुनरावृत्तिविरहित

त्रिर्गलितवेद्यान्तरमानन्दस्वरूपंमोक्षमित्यर्थः वितरवितर देहिदेहि अनेन श्रीगङ्गायास्सर्वसामर्थ्यशालिमहिमवैभवाश्रयत्वन्ध्वनितम् ॥ ८७ ॥ अथनिन्दाव्याजेनश्रीगङ्गाया
स्स्तुतिङ्कुर्वन् संप्रणयन्तामभिमुखीकुरुते अमरनदीति हेअमरनदित्रिदिवेशतटिनिश्रीगङ्गे योमनुजोयःकोऽपिमर्त्यः सकृदपिएकवारमपि कथञ्चित्केनापिप्रकारेण भवत्यास्तव
गङ्गेतिपूतम्पवित्रं सञ्चिताखिलकल्मषविलयकुशलमित्यर्थः नामाभिधानम् अन्तेप्राणोत्क्रमणसमये भाषतेसमुच्चारयति शीर्षमारुह्यतस्यशिरसि अधिष्ठिताभूत्वेत्यर्थः गलस्तस्य
मनुजस्यकण्ठएवगेहङ्गृहंयेषान्तैः समावेष्टिततत्कण्ठैरित्यर्थः पाशीभूतानांरज्वादिस्वरूपवन्धनसाधनीभूतानाम् नागानांसर्प्पाणाम् उरवोऽतिदीर्घायेदेहाभोगास्तेतथोक्तास्तैः
करणैः तम् स्वकीयम्पूतंनामभाषमाणम् मनुजम् व्यथयसिसम्पीडयसि इत्येतत्किमित्येतत्किम् किमितिप्रश्ने अद्भुतार्थप्रकाशनात् वीप्सायान्द्वित्वम् अतीववैपरीत्यमित्यर्थः
सतुत्वन्नामोच्चारकः त्वन्तदतिपीडाप्रदेतिनिन्दया कथमपिसकृदपि स्वनामोच्चारणकर्त्तारंमनुजमात्रम् श्रीमन्महादेवविग्रहंविधाय कण्ठदेशेनागैः मूर्द्धि निजप्रवाहेण भूषय

अमरनदि भवत्या नाम गङ्गेति पूतं सकृदपि मनुजो यो भाषते ऽन्ते कथञ्चित् । किमिति किमिति पाशीभूत-
नागोरुदेहै र्व्यथयसि गलगेहै स्तं समारुह्य शीर्षम् ॥ ८८ ॥ हरिपदजनितस्ते शम्भुकेशै श्च बन्धा ज्जलधिशिख-
रिपुत्र्यो र्गर्ववत्यो र्विवादम् जननि परिहरन्तीं स्वाम्बुपानादिरक्ता न्हरिगिरिशतनूका न्कुर्वती न्त्वा म्प्रपद्ये ॥८९॥

सीत्यतीवाचिन्तनीयप्रभावासीतिस्तुतिर्गम्यते अनेनश्रीगङ्गानामप्रभावोलोकोत्तरइतिसूचितम् ॥ ८८ ॥ अथश्रीगङ्गायाभङ्ग्यन्तरेणजलपानादेरद्भुतफलवैभवन्दर्शयंस्तांस्तौति
हरिपदेति हेजननिमातर्गङ्गे स्वस्यात्मनः श्रीगङ्गायाइत्यर्थः यत् अम्बुजलम् तस्य पानादौ आदिनाऽवगाहनादिग्रहः रक्तानुरागवतोदेहिनः पञ्चत्वावसरे हरिगिरिशयोःश्री
विष्णुश्रीशङ्करयोः तनूरिवतनूश्शरीरंयेषान्तांस्तथोक्तान् बहुव्रीहौकप् कुर्वतीम् पुण्यानांसूक्ष्मतरतारतम्यात् कांश्चिद्विष्णुविग्रहान् कांश्चिच्छङ्करविग्रहान् विदधतीमित्यर्थः
अतएव हरिपदजनितः श्रीमद्विष्णुपादपद्मप्रादुर्भावात् चपुनः शम्भुकेशैः अर्थात् श्रीमन्महादेवातिसान्द्रदृढतरजटाजूटैः वन्धाद्बन्धनाद्वेष्टनात्सन्दाननादित्यर्थः गर्ववत्योरभि
मानवत्योः जलधिशिखरि पुत्र्योररत्नाकरगिरिराजकन्ययोर्लक्ष्मीपार्वत्योरित्यर्थः यथाक्रमम् कदाचित् श्रीमहादेवदर्शनार्थम् कैलासयात्रावसरे रहसि सहावस्थित्यवस्थायाम् ॥२६॥

२७

विवादम् यतः मत्पंत्युःश्रीविष्णोःपादाविनजनीभूता यतश्च अतएवगौरवा त्वत्पत्तिनामहादेवेन शिरसासत्कृताश्रीगङ्गा अतएव अहम् त्वत्तोऽतावप्रशस्तास्मि नहिनहि कोऽपि नास्तित्रिभुवनमण्डलेमद्धारणसमर्थइति निजश्यामलीभावसम्भावनयाभयान्नीलोत्पलदलकान्तिकान्तविष्णुपादाङ्गुष्ठनखमात्रमेवंस्पृष्ट्वा आगत्य स्वास्थ्यमनुभूयतिष्ठामीतिचतद्दुर्द्दर्पपर्वतदलनातिप्रौढकुलिशीभूतेनमत्स्वामिनात्रिभुवनेश्वरेणमहेश्वरेण निरायासमेवस्वजटाजूटैकशिषाभागेवन्दीकृतास्तिश्रीगङ्गा अतस्त्वत्तोऽतीवाहंश्रेष्ठास्मीतिपरस्पर-विरुद्धंवादम् परिहरन्तीन्त्वाम् अहम् प्रपद्ये शरणंव्रजामि अनेनश्रीगङ्गायाअनिर्वचनीयमाहात्म्यशोभित्वंसूचितम् ॥८९॥ अथश्रीगङ्गास्नानायगृहान्निर्गत्य मार्गएवलब्धपञ्चत्वा नांमानवानांसद्गतिप्राप्तिंवर्णयन् श्रीगङ्गांस्तौति त्वदधीति हेजननिमातःश्रीगङ्गे त्वदधिगमेभवदीयसमागमे मनश्चित्तंयेषान्तेतथोक्ताः शेषाद्विभायेतिवहुव्रीहौकप् एवमग्रेऽपि त्यक्त तेजस्तमस्काः परिहृतपराक्रमकार्यरजोगुण निर्विवेकत्वजनकतमोगुणाः सत्वैकप्रधानाइत्यर्थः तेजोदीप्तौप्रभावेचस्यातपराक्रमरेतसोरितिमेदिनी तमोराहौगुणेपापेध्वान्ते

त्वदधिगममनस्का स्त्यक्तते जस्तमस्का स्स्वनियतिपरतन्त्राःप्रोक्तगौरीशमन्त्राः ।
जननि पथि मृताये सत्पदे ते ऽनपाये किमु न हरिसमाना भान्ति सन्त स्समानाः ॥ ९० ॥

शोकेजवेवलेइतिहेमचन्द्रः स्वनियतिपरतन्त्रानिजदैवपराधीनाः निजदैवानुरोधादलब्धत्वद्दर्शनमनोरथसिद्धयइत्यर्थः दैवन्दिष्टम्भागधेयम्भाग्यं स्त्रीनियतिर्विधिरित्यमरः अतएवप्रोक्तो गौरीशमन्त्रः नमश्शिवायेतिपञ्चाक्षरस्वरूपोगौरीशेतित्र्यक्षरस्वरूपोवायैस्तेतथोक्तास्सन्तः येमानवाः पथि त्वामप्राप्यैव त्वन्मार्गएवमृतागतासवोभवन्तेे तेशेरः तेमानवाः हरिसमानास्सुरेन्द्रतुल्याविष्णुसदृशाश्शिवसदृशावासन्तोभवन्तः हरिश्चन्द्रार्कवाताश्वशुकभेकयमाहिषु कपौसिंहेहरेऽजेंऽशौशक्रेलोकान्तरेपुमान् वाच्यवत्पिङ्गहरितोरितिमेदिनी अथचसमानास्तत्तल्लोकनिवासिभिस्सम्पादितसत्काराः देवरूपत्वात्समदृष्टयोवासन्तः अनपाये यद्गत्वाननिवर्त्तन्तेतद्धामपरमंममेतिवचनाद्विनाशरहिते सत्पदे उत्तमस्थाने परमेश्वरलोकेवा नभान्तिकिमु भान्त्येवेतिविमर्शः किमुसम्भावनायांविमर्शइतिहेमचन्द्रः अनेनकृतस्नानादिसङ्कल्पानांयदीदृशीगतिस्तर्हिकृतस्नानादीनान्तु कीदृशीतिध्वनितम् ॥ ९० ॥ अथश्रीगङ्गायागुणगानशून्यजिह्वानिष्फलतांवर्णयंस्तांस्तौति निजेति निजजनशुभेपुस्वसेवकजनकल्याणेषु चेतश्चित्तंयस्यास्सातथोक्ता तत्सम्बो-

धनम आत्मभक्तसमुद्धारोत्सुकेइत्यर्थः श्वश्श्रेयसंशिवम्भद्रङ्कल्याणंमङ्गलंशुभम् भावुकम्भविकम्भव्यङ्कुशलङ्क्षेममस्त्रियामित्यमरः धर्म्मकर्मणाञपदानतपोहोमयज्ञदेवाद्यर्चना दिधर्मकार्याणाम् हेतुःकारणन्तत्सम्बोधनम् धर्म्मकर्म्मस्थितिकारणस्वरूपे इत्यर्थः भवजलनिधेर्न्नानाविधजन्ममरणादिदुः खस्वरूपसंसारसमुद्रस्य सेतुरालिः पाशाणादिनि बद्धः पादचारेणनद्यादिपारतीरगमनसाधनविशेषः पुल्लिंगतिभाषयाप्रसिद्धः तत्सम्बोधनम् स्वसेवकसंसारोद्धारकुशलेइत्यर्थः सेतुरालौस्त्रियाम्पुमानित्यमरः मोक्षसम्पत्तेर्मोक्ष सम्पदः कैवल्यैश्वर्यस्पेत्यर्थः केतुःपताका तत्सम्बोधनम् शरणागतजनकैवल्यमुक्ति सिद्धिसूचकध्वजस्वरूपेइत्यर्थः केतुर्द्युरुक्पताकाऽविग्रहोत्पातेपुलक्ष्मणीतिमेदिनी हेअम्ब जननिश्रीगङ्गे ययाजिह्वयारसनया तव गुणनिकुरम्बंसुचरितातिरमणीययशस्संवलितपतितजनोद्धारधुरन्धरत्वादिगुणसमूहम् गुणोमौर्व्यामप्रधानेरूपादौसूदइन्द्रिये त्याग शौर्य्यादिसत्वादिसन्ध्याद्यावृत्तिरज्जुष्वितिमेदिनी समूहोनिवहव्यूहसन्दोहविसरव्रजाः स्तोमौघनिकरव्रातवारसङ्घातसञ्चयाः समुदायस्समुदयस्समवायश्चयोगणः स्त्रियान्तु

निजजनशुभचेतो धर्म्मकर्म्मैकहेतो भवजलनिधिसेतो मोक्षसम्पत्तिकेतो । तव गुणनिकुरम्ब न्नो यया गीतमम्ब त्रिदिवधुनि तयेह व्यर्थया जिह्वया किम् ॥ ९१ ॥ व्यपगतसुविवेकाः पूर्वजन्माघभारै र विरतनिरयस्थाः किं न्न जायन्त एते । भुवननुतगुणाया न्त्वय्यजाद्यर्च्चिताया मितरसरिति वा ऽहो ये मतिं कुर्वतेऽम्ब ॥ ९२ ॥

संहतिर्वृन्दंनिकुरम्बङ्कदम्बकमित्यमरः नोगीतम् प्रेमरससंस्कृततत्तत्स्वरग्रामादिगोचरताम् नोप्रापितम् यद्वा सज्जनगोष्ठीषु नोकथितम् हेत्रिदिवधुनिस्वर्णदि इहास्मिन्देहेलोके जन्मनिवा व्यर्थया अक्षयसुखसाधनत्वदीयसुगुणगणगानपराङ्मुखत्वेननिष्फलसद्भावया तया जिह्वया किम् नकिमपिफलमित्यर्थः एतादृशीजिह्वाछागीकण्ठस्तनवन्निष्फलै वेतिभावः अनेन विवेकिभिस्सर्वदैवश्रीगङ्गागुणगानंविधेयमितिध्वानितम् ॥ ९१ ॥ अथश्रीगङ्गायांसाधारणनदीबुद्धिफलन्दर्शयंस्तांस्तौति व्यपगतेति हेअम्बमातः श्रीगङ्गे पूर्व जन्माघभारैः प्राक्तनानेकजन्मसञ्चितदुष्कृतसमूहैः अन्यथाकथमेतादृगविवेकवैभवमित्यर्थः व्यपगतोविनष्टस्सुविवेकः सत्यतयासदसद्वस्तुविचारोयेषान्तेतथोक्ताः येजनाः भुवननुतगुणायान्त्रिजगत्संस्तुतदयालुत्ववदान्यत्वशरण्यत्वपतितजननिरयपातनिवारणोत्सुकत्वादिसद्गुणगणायाम् अजादिभिस्साक्षाद्ब्रह्मदेवादिभिरपि इतरेपाङ्गात्राच्चैति ॥२२॥

भावः अर्चितायास्पूजितायांसत्कृतायामित्यर्थः अन्यथा त्वत्स्नानादिनाऽपगतपापान् ब्रह्मलोकादिगतान्प्राणिनः कथन्तेसत्कुर्युरित्यर्थः अजश्छागेहरेविष्णौरघुजेवेधसिस्मरे इतिहेमचन्द्रः त्वयिसाक्षाद्ब्रह्मद्रवस्वरूपायांश्रीगङ्गायाम् अहोइत्याश्चर्येमहदाश्चर्यमेतदित्यर्थः इतरसरितिव साधारणतया अन्यनद्यामिव वशब्दोऽत्रेवार्थकः वस्प्रचेतसिजानी यादिवार्थेचतदव्ययमितिमेदिनी शात्रवंवपपुर्यशइतिरघुकाव्ये मतिम्बुद्धिम् कुर्वते यथान्यास्सहस्रशोनद्योभूमौवर्त्तन्तेतथेयमप्येकानद्यस्ति कोऽस्यस्यांविशेषइतिमनसिनि श्चिन्वन्तिइत्यर्थः ते एतेप्रक्रान्तवृत्ताजनाः अविरतंनिरन्तरमविच्छिन्नस्वबहुकालपर्य्यन्तमित्यर्थः निरयेषुरौरवकुम्भीपाकादिनामधेयेषुनरकेषु तिष्ठन्तीतितथाभूताः नजायन्तेन भवन्तिकिम् अपितुजायन्तएवेत्यर्थः अनेन आस्तिकेनमानवेन जातुचिदपिश्रीगङ्गायामन्यनद्यामिवजलमात्रबुद्धिर्नविधेयेतिद्योनितम् ॥ ९२ ॥ अथश्रीगङ्गायांभक्तिंविनाबहुलतर धनधान्यादिवैफल्यंवर्णयन् तांस्तौति बहुभिरपीति हेअम्बमातःश्रीगङ्गे चेद्यदि हृदयेमनुष्याणाम्मानसे तेतव भक्तिरनुरागाविशेषः नजागर्त्तिनोद्बुद्धास्ति तर्हि हेदेवि एभिर्दश्य

बहुभिरपि किमेभि र्देवि धान्यै र्धनै र्वा धृतिमतिकुलशीलैः किं न्नयाचारशौर्य्यैः ।
यमनियमतितिक्षादानदाक्षिण्यमुख्यैः किमथ न हृदये चे त्तेऽम्ब जागर्त्ति भक्तिः ॥ ९३ ॥

मानैः बहुभिरपरिमितैः धान्यैर्व्रीह्यादिभिः वाऽथवाधनैर्नानाविधैर्द्रव्यैः किम् नकिमपीत्यर्थः ऐहिकसुखमात्रसाधनत्वात्तेषान्निरर्थकत्वमेवेतिभावः धृतिर्धैर्यम् मनसोविक्षोभहे तौसत्यपि अक्षोभता मतिस्सर्वत्रैवकार्यजातेऽतिकुशलाबुद्धिः कुलंनिष्कलङ्कोऽतिख्यातोऽनुत्तमोवंशः शीलंस्ववर्णाश्रमाविरुद्धसुचरिताश्रयणमनस्कत्वम् शुचौतुचरितेशील मित्यमरः तैश्चकिम् नकिमपीत्यर्थः केवलंलौकिक सिद्धिहेतुत्वात्तेषाम्मोघत्वमितिभावःअथ नयोनीतिः धर्म्यमाचरणमित्यर्थःशास्त्रदृष्टेनविधिनानिजसर्वकर्मप्रवृत्तिरूपोव्यापार विशेषः शौर्य्यंशूरत्वम् क्वचिदप्यकातरत्वमित्यर्थः तैःकिम् नकिमपीत्यर्थः ख्यातिमात्रफलकत्वात्तेषामपिवैफल्यमित्यर्थः यमाअहिंसादयःपञ्च तत्राहिंसासत्याऽस्तेयब्रह्मचर्य्याऽ परिग्रहायमाइतिभगवान्पतञ्जलिः नियमाश्शौचप्रमुखाःपञ्च तथाच शौचसन्तोषतपस्स्वाध्यायेश्वरप्रणिधानानिनियमाइतिभग वान्पतञ्जलिः शरीरसाधनापेक्षंनित्यंयत्कर्मतद्यमः नियमस्तुसयत्कर्मनित्यमागन्तुसाधनमित्युभयत्राप्यमरः तितिक्षाक्षान्तिर्द्वन्द्वदुःखसहनमित्यर्थः क्षान्तिस्तितिक्षेत्यमरः दानंस्वस्वत्वनिवृत्तिपूर्वकं शास्त्रीयपात्रस्वत्वप्रतिपादनम्

दाक्षिण्यंसर्वस्मिन्कर्मणिचातुर्य्यम् तन्मुखस्तैतत्प्रभृतिभिः अथकिम् नकिमपीतिभावः तेषाङ्क्षयिष्णुस्वर्गीयस्रक्चन्दनवनितादिसमुपभोगफलत्वाद्यर्थत्वमेवेतिभावः अनेनेभ्यह स्सर्वेभ्योऽत्यधिकाऽक्षयिष्णुनिर्वाणसुखहेतुत्वादेकाश्रीगङ्गाभक्तिरेवसर्वथैवविवेकिभिर्विधेयेतिध्वनितम् ॥ ९३ ॥ अथश्रीगङ्गायाहरिहरादिभ्योप्याधिकसामर्थ्यशालित्वन्दर्शयं स्तांस्तौति हरिरिति हेजननिश्रीगङ्गे यस्यातीवपापकारिणःप्राणिनः शुद्ध्यैशुद्धिङ्कर्त्तुम् पापमोचनायेत्यर्थः क्रियार्थोपदस्येत्यादिनाचतुर्थी हरिर्दिशरणागतजनदुःखनिवारणकगृहि तदीक्षः श्रीविष्णुः असरला केनमूर्खेणात्रानीतोऽयमतीवपापिष्ठोजनस्त्वरितमेवातोतिर्गच्छत्वितिवक्रतरा दृष्टिःप्रेक्षणंयस्यसतथोक्तोभवतीतिशेषः एवमग्रेऽपि यत्रान्यतक्रियाय दंनास्ति तत्रास्तिर्भवतिर्वाप्रथमपुरुषेप्रयुज्यते इतिन्यायोऽत्रप्रमाणम् गिरीशोऽखिलब्रह्माण्डनायकः सुरनरनागसमर्चितपादाम्बुजोऽतिदयालुस्सत्वरप्रसादिस्वभावोमहादेवो ऽपिदत्तपृष्ठः नाऽयन्दर्शनीयोऽतिदुष्कृतकारीशरीरीतिपृष्ठपरिवर्तनंविधायपराङ्मुखोभवति अथच विधिर्निखिललोकविधानकुशलस्सर्वस्पजगतः पितामहोवेदयोनिः श्रीब्रह्मा

हरिरसरलदृष्टिर्दत्तपृष्ठो गिरीशो विधिरपि विधिशून्यो दीनदीनो दिनेशः । निखिलमपि च तीर्थं न्यङ्मुखं यस्य शुद्ध्यै जननिविजयसे त्व न्त न्दिवम्प्रावयन्ती ॥ ९४ ॥ विधिकृतसुकृताना ज्ञायते स्वर्न्निवासो दुरितरतमतीना न्दुर्गतौ चाप्यवश्यम् । सफलमुदितमेत त्तत्र यत्राऽस्ति नाम्ब त्रिभुवनसुपवित्रा सच्चरित्रा कथा ते ॥ ९५ ॥

देवोऽपिविधिशून्यः नास्त्यस्यपापिष्ठस्यक्वचिदपि वेदेशास्त्रेपुराणेवा प्रत्यवायानिवर्तकप्रायाश्चित्तविधानमितिविधानरहितोभवति विधिर्ज्ञानियतौकालेविधानेपरमेष्ठिनीतिमेदिनी अथच दिनेशःसकलविश्वान्धकारनिवारणप्रचण्डतरतेजस्कः श्रीमान्मार्त्तण्डोऽपि दीनदीनः कथमस्यदुरिताकरस्यजीवस्यशुद्धिर्भवेदितिविचारव्यग्रमानसतयाऽतिनिस्तेजस्को भवति अपिच निखिलन्त्रिभुवनमध्यवर्त्तिसर्वम् तीर्थम्पुण्यक्षेत्रम् न्यङ्मुखम् अनेनदुष्टेनपापिजनशिरोमणिना स्वशुद्ध्यसमर्थानामस्माकम्प्रतिष्ठाधूल्याम्मेलितेत्यधोमुखम्भवति तंहरिप्रमुखैर्निराकृतम्प्राणिनम् निजदर्शनादिमात्रेण निष्कल्मषंविधाय दिवंस्वर्गम् प्रापयन्तीसतीत्वम् विजयसेसर्वोत्कर्षेणवर्त्तसे दि मितिवैकुण्ठादेरुपलक्षणम् अनेनश्रीगङ्गायाअलौकिकमाहात्म्यवैभवदर्शनव्याजेनावश्यसेवनं यत्वन्ध्वनितम् ॥ ९४ ॥ अथपुनरपिभङ्ग्यन्तरेणश्रीगङ्गायामाहात्म्यकथाप्रभाववर्णनव्याजेनतांस्तौति विधीति हेअम्बमातः श्रीगङ्गे यत्रयस्मिन्देशे त्रिभुवनन्त्रिजगत् सुशोभनमतिरमणीयम् पवित्रम्पूतञ्चययासातथोक्ता त्रिभुवनेत्रिलोक्याम् सुशोभनाचासौपवित्राचसातथोक्ता अतीशयोवास्वर्थः ॥२८॥

तेनपवित्राऽतिपवित्रेत्यर्थः सन्तिसमीचीनानिप्रशंसनीयानीत्यर्थः चरित्राणिविविधपतितजनसमुद्धारप्रभृतानियस्यांसातथोक्ता तेतवकथा भवदीयगुणगणकथनस्वरूपा ना-
ऽस्तिनवर्त्तते तत्रतस्मिन्देशे विधिकृतसुकृतानांशास्त्रनिर्दिष्टविधानविहितनानाविधपुण्यानाम् न्दणाम् स्वस्स्वर्गेनिवासोजायते स्वरव्ययंस्वर्गनाकत्रिदिवत्रिदशालयाः सुरलोको-
द्योदिवौद्वेस्त्रियाङ्क्लीवेत्रिविष्टपमित्यमरः अथच दुरितरतमतीनाम्पापैकासक्तबुद्धीनांमनुजानाम् अवश्यमेव दुर्गतौनरकेदुर्गतिर्नरेके निस्स्वेस्त्रीतिमेदिनी निवासोजायते एत
दुदितमुक्तम् स्मृतिपुराणप्रतिपादितमित्यर्थः सफलंसार्थकम् भवतीतिशेषः त्वत्कथाप्रसङ्गपवित्रीकृतेदेशेवसताञ्जनानाम् नियतस्वर्गाद्युत्तमलोकप्राप्तेरवश्यम्भावित्वान्नतत्रे-
तिभावः अनेन यस्मिन्देशे श्रीगङ्गाकथा सज्जनैर्गीयतेश्रूयतेस्मर्यतेश्रद्धीयतेच सदेशप्रवनमस्करणीयः तद्वासिनान्तुकावार्त्तेतिध्वनितम् ॥९५॥ अथसुन्दरमन्दिरस्थापना
पूवर्कस्वर्णादिनिर्म्मितश्रीगङ्गामूर्त्तिपूजनमाहात्म्यंनिरूपयन् श्रीगङ्गांस्तौति प्रतीति हेअम्बमातः श्रीगङ्गे अभिरूपांमनोज्ञाम् प्राप्तरूपस्वरूपाभिरूपाबुद्धमनोज्ञयोरित्यमरः नि

प्रतिकृतिमभिरूपा न्तेऽम्बनिर्दिष्टरूपाङ् कुशलरचित उच्चै र्म्मन्दिरे स्थापयित्वा ।
सविधि सदुपचारैः प्रार्च्य य स्स्तौति भावा त्स किमु न गतशोके तावके याति लोके ॥ ९६ ॥

र्दिष्टोऽत्रैव ध्यानप्रतिपादितेकुलकेऽन्यत्रपुराणादौवा दर्शितः रूपआकारोयस्यास्सातथोक्ताताम् रूपंस्वभावसौन्दर्य्येनालोकेपशुवृन्दयोः ग्रन्थावृत्तौनाटकादावाकारश्लोकयोर
पीतिमेदिनी तेतव प्रतिकृतिन्तात्त्विकदिव्यभवदीयविग्रहप्रतिनिधिंहेमादिनिर्म्मितांमूर्त्तिमितियावत् प्रतिकृतिरथार्चायाम्प्रतिनिधिप्रतिकारयोश्चस्त्रीतिमेदिनी कुशलैश्शिल्प
शास्त्राभिज्ञैः रचितेसुनिर्म्मिते उच्चैर्म्महत्युन्ननेवा महत्युच्चैरित्यमरःमन्दिरेप्रासादे स्थापयित्वाविधिपूर्वकंनिधायेत्यर्थः योभाग्यशालीमनुष्यः सविधिशास्त्रोक्तार्चाविधिपूर्वकम्
सदुपचारैर्न्निर्दोषैः षोडशसङ्ख्याकैः पूजोपकरणैः आसनंस्वागतञ्चार्घ्यम्पाद्यमाचमनन्तथा मधुपर्कार्चनस्नानवसनाभरणानिच गन्धपुष्पेधूपदीपौनैवेद्यञ्चन्दनन्तथेतिषोड-
शोपचाराआचारचिन्तामणौ प्रार्च्य प्रकर्षेण सोत्साहमित्यर्थः अर्चयित्वा भावाद्भक्तिसंस्कृताभिप्रायात् भावोऽभिप्रायंवस्तुनोः स्वभावजन्मसत्तात्मक्रियालीलाविभूतिषु
चेष्टायोन्योर्बुधेजन्तौश्रृङ्गारादेश्चकारणे शब्दप्रवृत्तिहेतौचेतिहेमचन्द्रः चन्द्रालोकेजयदेवस्तु रतिर्देवादिविषयासन्तिचव्यभिचारिणः वेद्यमानानिगद्यन्तेभावास्साहित्यवेदि-

29

भिरित्याह तत्परिपायगुण्डोपाध्यायवैद्यनाथाः देवादिविषयिणीरतिर्भाव: आदिनानृपगुरुमुनिसुतविषयापीति अतोभावाद्रतेरित्यर्थः स्तौति वैदिकैः पौराणिकैः प्राकृतैर्वा स्तोत्रैः स्तवनम् कुरुते तवसुगुणगणवर्णनम् विधत्ते समनुष्यः गतशोके आधिशून्ये तावकेत्वदीये लोके तव विष्णुपदीत्वात् वैकुण्ठे शङ्करशीर्षस्थितत्वाच्छिवलोकेवेत्यर्थः नयाति नप्राप्नोतिकिमु किन्तु यात्येवेत्यर्थः अनेन श्रीगङ्गाभक्तिरससान्द्रतरहृदयैः सद्गतिसाधनीभूता श्रीगङ्गामूर्त्त्यर्चासर्वथैवविधेयेतिसूचितम् ॥ ९६ ॥ अथश्रीगङ्गा-सेवकानाङ्कृतकृत्यतान्निरूपयंस्तांस्तौति सुविमलेति हे श्रीगङ्गेइत्यध्याहारः यैस्सुकृतिभिर्भक्तैः भक्तितोनतुदम्भलोभादितः स्थिरतरसुखदानिर्वाणपरमानन्दप्रदा त्वम् सेविता-समर्चिता असीतिशेषः तएव सुविमलविधयश्शोभनस्वच्छभाग्याः अन्यथा कथम् त्वदीया भक्तिरित्यर्थः अतएव तएव पुण्यवन्तोऽनुमितपूर्वजन्मसुकृतराशयः अतएव तएव श्रुतिविहितसपर्यातोषितेशावेदोक्तपूजाऽतितुष्टीकृतश्रीशङ्कराः भवत्सेवैवश्रीशङ्करसेवेत्यर्थः यद्वा पूर्वजन्मसमूहसमर्चितश्रीचन्द्रशेखरप्रसादलब्धेयन्तेषाम्भवदर्चेतिभावः

सुविमलविधय स्ते पुण्यवन्त स्त एव श्रुति विहितसपर्यातोषितेशा स्त एव । त्रिजगति सुधिय स्ते सत्समज्ञा स्त एव स्थिरतरसुखदा त्व म्भक्तित स्सेविता यैः ॥९७॥ श्रुतिभिरपि सहाङ्गै स्सेतिहासैःपुराणै स्स्मृतिभि रुपपुराणै स्सत्प्रबन्धै र्निबन्धै : तनुमपि महिमानं शक्यते ते न गातुं यदि तदतिवराकी गी र्म्मदीयाऽम्ब काऽत्र ॥ ९८ ॥

अतएव तएव त्रिजगतित्रिभुवने सुधियः पण्डिताः भवदीया भक्तिरेवविवेकशालिबुद्धेःफलमितिभावः विद्वान्विपश्चिद्दोषज्ञः सन्सुधीःकोविदोबुधः धीरोमनीषीज्ञःप्राज्ञ-स्सङ्ख्यावान्पण्डितःकविः धीमान्सूरिः कृतीकृष्टिर्लब्धवर्णो विचक्षणः दूरदर्शीदीर्घदर्शीत्यमरः अतएव तएव सत्समज्ञाश्शोभनकीर्त्तयः यशःकीर्तिस्समज्ञाचेत्यमरः भवत्सेवांविना कथंशुभ्रंयशइतिभावः अनेन जन्मसाफल्यनिदानम् श्रीगङ्गायानिर्व्याजसपर्य्यैवेतिध्वनितम् ॥ ९७ ॥ अथश्रीगङ्गायास्स्तुतिविधाने निजगर्वम्परिहरं स्तांस्तौति श्रुतिभिरिति हेअम्बमातःश्रीगङ्गे यदिचेत् अङ्गैश्शिक्षादिभिः षड्भिः सहसार्द्धम् शिक्षाकल्पोव्याकरणंनिरुक्तञ्ज्योतिषाङ्गणः छन्दसांविचितिश्चेतिषडङ्गोवेदउच्यते इति श्रुतिभिरपि चतुर्भिरपिवेदैः श्रुतिस्त्रीवेदआम्नाय इत्यमरः इतिहासैर्भारतादिभिस्सह वर्त्तन्तेइति तैश्च पुराणैरष्टादशभिर्म्मत्स्यपाद्मस्कान्दादिभिः स्मृतिभिरष्टा

दशभिर्म्मनुसंहिताप्रभृतिभिः उपपुराणैरष्टादशभिः कालिकापुराणादिकैः सन्तोनिर्दोषसुभगरचनाशोभिनः प्रबन्धाअवान्तरग्रन्थायेषान्तैः निबन्धैर्न्नूतनसत्कविनिर्म्मि-
तैर्ग्रन्थैः सङ्ग्रहग्रन्थैस्त्रिस्थलीसेतुप्रभृतिर्वा तेतव तनुमपिस्वल्पमपि महिमानंमहत्त्वम् गातुङ्कथयितुम् नशक्यतेनपार्यते समर्थैर्न्नभूयते इतियावत् तर्त्तर्हि अतिवराकीस्वल्प
तरसामर्थ्यविशिष्टत्वादतिशोचनीयाऽतितुच्छेतियावत् मदीया गीर्वाणी अत्र भवदीयमहिमगाने का नकापीत्यर्थः कथमपिनशक्तेतिभावः अनेन श्रीगङ्गागुणमहिम्नोऽपरि
च्छिन्नत्वंसूचितम् ॥ ९८ ॥ अथ ममपूर्णगुणमहिमवर्णनेसर्वस्याशक्तत्वादल्पगुणगानेनाकिमितिवदन्तीश्रीगङ्गाम्प्रति स्वकीयस्वल्पगुणवर्णनमाहात्म्यंश्रावयन्स्तौति गुणकणेति
हेविमलतरगुणौघेस्वच्छतरगुणनिकरे गङ्गेमातः तावकीनन्त्वत्सम्बन्धिनम् गुणकणमपि स्वल्पमपिगुणमित्यर्थः भक्तिभावात्सानुरागम् नत्वौदासीन्यात् योमनुष्योयःकोऽपि
मानवः स्तौतिस्तुतिविधयाकथयति सः मनुष्यः कृतकृत्यस्सफलजन्मा भवति अथ हेदेवि तस्य गीर्वाणी कृतार्थासफला भवति चपुनः असौत्वद्गुणकणस्तोता सुकवीनां

गुणकणमपि गङ्गे तावकीनं मनुष्यो विमलतरगुणौघे स्तौति यो भक्तिभावात् । स भवति कृतकृत्यो देवि तद्गीः
कृतार्था सुकविसदसि गुर्वी मेति चासौ प्रतिष्ठाम् ॥ ९९ ॥ तव ननु नुतिमेतांस्वस्तरङ्गिण्यकार्ष न्न जननि निज-
कीर्त्यै देवि सत्य म्ब्रवीमि। विविधबहुल मिथ्यावादकालुष्यपूर्णाम्भगवति निजबाणीं ङ्किन्तु शुद्धां विधातुम् ॥१००॥

सत्कवीनाम् सदसिसभायाम् समाजेइत्यर्थःगुर्वींमहतीम् प्रतिष्ठांसम्मानाम् पतिप्राप्नोति अनेन यथाशक्ति सर्वैरेव सर्वथा सप्रेमभरम् श्रीगङ्गागुणगानङ्कर्त्तव्यमितिध्वनितम् ।९९
अथसानुनयम् श्रीगङ्गायास्स्तुतिप्रवृत्तिनिमित्तंवर्णयंस्तांस्तौति तवेति हेस्वस्तरङ्गिणिस्वर्णदि जननिमातःश्रीगङ्गे एताम्प्रक्रान्ताम् वृत्तशतकविषयाम् नुतिंस्तुतिम् निजकीर्त्यै
निजाङ्कीर्त्तिम् लोकेविस्तारयितुमित्यर्थः नाऽकार्षनव्यधाम् हेदेवि सत्यम् ब्रवीमियथार्थङ्कथयामि नमिथ्येत्यर्थः किन्तु हेभगवति षडैश्वर्य्यसम्पन्ने विविधोवहुविधः बहुलो
ऽनल्पः योमिथ्यावादः तत्तत्प्रसङ्गसम्भाषणावसरेऽसत्यसम्भाषणम् सएव तेनवा यत्कालुष्यम्पापमालिन्यम् तेनपूर्णांसम्भृताम् गर्हणीयामित्यर्थः निजवाणींस्वकीयाङ्गिरम् ॥२०॥
शुद्धांमिथ्यावादजनितपापमलविरहिताम् विधातुङ्कर्त्तुम् अकार्षम् ननु फलार्थम्वृक्षारोपणस्यच्छायेव कीर्त्तिस्तु आनुषङ्गिकम्फलमितिभावः अनेन श्रीगङ्गास्तुतेर्बाणीदोषनिवार-

कत्वंसूचितम् ॥१००॥ अथैतत्स्तोत्रनामधेयम्प्रकारविशेषेणदर्शयन्नेतत्स्वप्रयत्नसाफल्याय त्रिभुवनेश्वरे श्रीमहेश्वरे समर्प्पयति शरणेति हेशरणगजनबन्धो शरणागतानाञ्ज- नानांसर्वापन्निवारणाद्बान्धव हेदेव सर्वान्तर्यामिन् दीप्तिशालिन्वा हेकारुण्यसिन्धो कृपारसाब्धे दीनदयालो हेतुहिनकिरणमौलेचन्द्रचूड निखिलजनाह्लादनिदानश्रुतिगण विहारात्क्रीडबाडवकुलभूपालामृतांशुमुकुटमणेवा सर्वेषान्देवानाम् एकमौलिर्मुख्यकिरीटमिव सतथोक्तस्तत्सम्बोधनम् हेसर्वदेवातिप्रशस्तेत्यर्थः अत्र श्रीशङ्करस्य पञ्चवक्त्र त्वात्सम्बोधनपञ्चकेनसम्मुखीकरणमुचितमेवेत्यभिसन्धिः इत्येताः पुरोवर्त्तिन्यः परङ्केवलम् शतसङ्ख्याः शतमितिसङ्ख्यायासान्तास्तथोक्ताः ममेमामामिकामन्निर्म्मिताइत्यर्थः पद्यानिमालिनीनामानिवृत्तानि एव गङ्गालहर्य्यः श्रीमद्भागीरथीमहोर्म्मयः तरङ्गेभङ्ग वीच्यूर्म्युत्कलिकाभहतित्विह लहर्य्युल्लोलकल्लोला इतिहेमचन्द्रः हेगिरिशपर्वतवर

शरणगजनबन्धो देव कारुण्यसिन्धो तुहिनकिरणमौले सर्वदेवैकमौले। परमितिशतसङ्ख्याः पद्यगङ्गालहर्य स्तव गिरिश जटाया म्मामिकाः प्रोलसन्तु ॥ १०१ ॥ सर्वदां सर्वदादेवा देवीं ङ्गङ्गां स्तुवन्ति याम् भोगमोक्षाभिलाषी तां स्तोतुकामो नकोभुवि ॥ १०२ ॥ गङ्गालहरीशतके यः श्रुतिजिह्वामनांसि मज्जयति स भवति गङ्गास्नायी स्वपितृसमुद्धारक श्चासौ ॥ १०३ ॥

कैलासनिवासिन् समुपभोगेनशैलोत्तमकैलासतनुत्वविधायिन्वा असङ्ख्याततरङ्गिणीविलासाश्रयकैलासाचलशयनप्रियेतिवा इदंषष्ठंसम्बोधनन्तु पुनः विज्ञप्त्यवसरे तच्छ्रवणै कतानमनस्कतयासम्मुखीकरणार्थमित्यनुसन्धेयम् तवजटायाङ्कस्याश्चिदेकस्यामेवजटाजूटशाखायाम् प्रोल्लसन्तु अत्युत्तमाश्रयलाभात्समुल्लासम्प्राप्नुवन्त्वित्यर्थः अनेन श्री महादेवे समर्पितंवस्तुसफलम्भवतीतिध्वनितम् ॥१०१॥ अथश्रीगङ्गास्तवनौचित्यंसर्वेषूपादिशति सर्वदामिति सर्वदांमनोभिलषितमात्रप्रदात्रीम् याङ्गङ्गान्देवीम् सर्वदानित्यम् सर्ववरप्रदातारोवा देवाअपि स्तुवन्ति ताङ्गङ्गाम् भुविभूलोके भोगमोक्षाभिलाषी ऐहिकपारलौकिकोभयसुखेप्सुः कोमनुजः स्तोतुकामः तद्गुणवर्णनेच्छुर्न भवेदितिशेषः किन्तु सर्वएवभवेदितिभावः अनेन श्रीगङ्गायाभुक्तिमुक्तिप्रदत्वन्ध्वनितम्॥ इदम्पथ्यावक्त्रञ्छन्दः युजोर्जेनसरिद्भर्तुः पथ्यावक्त्रम्प्रकीर्त्तितम् इतिलक्षणात् ।१०२। अथश्रीगङ्गालहरी

दीदक्षिणकूलविराजमानविद्वद्वरसमलङ्कृतातिरमणीयप्रासादधोरणीविभूषितसर्ववस्तुसमृद्धिसमृद्धयोगीन्द्रश्रीकायनाथसंरक्षितवेदान्तविद्यैकानिवासास्पद भयहरनामकनगरवरजन्मभूमेरपि श्रीकाश्याम् मनसा क्षेत्रसन्न्यासमङ्गीकृत्य श्रीमन्महाराजविश्वेश्वरपदपद्मद्वयसेवैकपरायणस्य लक्ष्मनिारायणस्य लक्ष्मीनारायणनामकस्यमेमम इत्येषा श्रीगङ्गालहरीशतकस्वरूपा कृतिर्निर्म्मितिकर्म पूर्णतम्परिसमाप्तिम् समगात्सम्प्राप्ता अत्रप्रमथेत्यादिपदैःअस्यान्तेमङ्गलवत्त्वंसूचितम् इदंस्रग्धरावृत्तम् म्रभ्नैर्यानान्त्रयेणत्रिमुनियतियुतास्रग्धराकीर्त्तितेयमितिलक्षणात् फाल्गुनस्यसिताष्टम्यांवस्वग्निनवभूमिते वैक्रमेऽब्देशनौटीकापूर्णालपपुरेऽभवत् ।१। विवृतिरियमतीवप्रेमपात्रस्यसख्युस्सहृदयकविमौलेस्स्वान्तसन्तोषहेतोः अमरसरिदुदारस्तोत्र सम्बन्धरम्याव्यरचिखलुमयासौविज्ञवर्य्यैकगम्या ।२। एकस्मिन्नेवसूनौसातिमुदितमनाश्शङ्कराच्चाऽनुरक्तस्सक्तस्सद्विद्यगोष्ठ्याम्भयहरनगरात्स्वोद्भवस्थानतोयः ॥ काश्यामागत्यकृत्वानिवसतिनितराङ्क्षेत्रसन्न्यासमन्तर्ल्लक्ष्मीनारायणोऽसौस्तवमिममकरोज्जन्मसाफल्यहेतोः । ३ । १०४ ।

इति श्रीमद्वाराणसीपुरवास्तव्यलवपुरसंस्कृतपाठशालाप्रधानाध्यापकमहामहोपाध्यायत्रिवेदगुरुप्रसादाभिधानकपण्डितवरविरचिता श्रीमल्लक्ष्मीनारायणाह्वयकविवरविरचित श्रीगङ्गालहरीशतकस्तोत्रव्याख्या श्रीगङ्गालहरीसमुल्लाससमाख्यासम्पूर्णा ॥ सं. १९६० श्रा० शु० ॥

शतकनामकस्यास्यस्तोत्रस्यपाठश्रवणमननमाहात्म्यंवर्णयति गङ्गेति यः शुभभाग्यभरसम्भृतोमनुष्यः गङ्गालहरीशतके एतन्नामकेऽस्मन्स्तोत्रे श्रुतिजह्वामनांसि कर्णरसन चेतांसि मज्जयतिस्नपयति सादरमेतत्स्तोत्रम् शृणोति पठति विचारयतिचेत्यर्थः समनुष्यः गङ्गास्नायी गङ्गास्नानकर्त्ता साक्षाद्गङ्गास्नानफलभागित्यर्थः भवतिजायते सपुनः स्वपितॄणामात्मीयोभयकुलपूर्वपुरुषाणाम् सम्यक् यथा पुनर्नदुर्गतिम्प्राप्नुवन्तु तथोद्धारकोऽस्त्युच्चैःपदप्रापकोभवेदित्यर्थः अनेनश्रीगङ्गागुणगानश्रवणमनानाम् भोगमोक्षादिसाधनत्वन्ध्वनितम् ॥ आर्य्येदञ्छन्दः लक्ष्मैतत्सप्तगणागोपेता भवतिनेहविषमेजः ॥ षष्ठोऽयंनलघूवाप्रथमेर्द्धेनियतमार्य्यायाः । १ । यष्ठेद्वितीयलात्परकेन्लेमुखलाच्च सयतिपदनियमः ॥ चरमेऽर्द्धे पञ्चमकेतस्मादिहभवतिषष्ठोलइतिलक्षणात् । २ । ॥१०३॥

पताला ग्न्यङ्कपृथ्वीपरिमितिकलितेवैक्रमे नन्दने ऽब्दे माघे शुक्ले ऽथ पक्षे सुरगुरुदिवसे ऽहेस्तिथौ सद्गुणाधाम् ।
लक्ष्मनिारायणस्य प्रमथपतिपदद्वन्दसंसेविनो मे श्रीशम्भो राधान्या क्कृतिरिति समगात्पूर्णताङ्काशिकायाम् ॥१०४॥

इति श्रीमत्कौशल्यगोत्रोद्भवसारस्वतकुलतिलकसकलविद्यारत्नरत्नाकरपण्डितवरठाकरदत्तशर्म्मान्तेवासि लक्ष्मीनारायणाह्वयकविवरविरचितं श्रीगङ्गालहरीशतकंसम्पूर्णम् ॥

अथैतत्स्तोत्रनिर्माणसमयादिकन्निर्दिशति पातालेति पातालाग्न्यङ्कपृथ्वीनाम् यापरिमितिस्सङ्ख्यापरिमाणम् आङ्कानां वामतोगतिरितिवचनात् एकनवत्रिसप्तस्वरूपेत्यर्थः १९३७ तया कलितेसिद्धे सप्तत्रिंशदधिकैकोनविंशतिशततमे इतियावत् वैक्रमेविक्रमादित्यनृपतिवरसम्बन्धिनि नन्दनेनन्दन नामके अब्देसंवत्सरे संवत्सरोवत्सरोऽब्दो हायनोस्त्रीशरत्समाइत्यमरः माघेमासि अथ शुक्लेपक्षे सुरगुरुदिवसेबृहस्पतिवासरे सद्गुणायांवसन्तमहोत्सवाद्युत्तमगुणविशिष्टायाम् अहेस्सर्प्पस्य तिथौपञ्चम्याम् वसन्तपञ्चमीतिख्यातायामित्यर्थः तिथीशावह्निकौगौरीगणेशोऽहिर्गुहोरविःशिवोदुर्गान्तकोविश्वेहरिः कामश्शिवश्शशीतिरामदैवज्ञः श्रीशम्भोर्भोगमोक्षैकनिदानार्चनस्य श्रीविश्वनाथस्य राजधान्याम्प्रधाननगर्याम् श्रीवाराणस्याम् प्रमथपतिपदद्वन्दसंसेविनः पश्चिमदेशाध्यवस्थवाराण्यमध्यवर्त्तिकाशीतिप्रसिद्धामरकुण्डाह्वयसत्तीर्थसमीपवितस्ताख्यसन्न-

श्रीगङ्गालहर्या अशुद्धिपत्रम् ।

पत्रम्	पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१	२	२	द	द्दै
१	२	१३	ङ्क	ङ्का
२	१	२	त्तयु	त्यु
२	२	१	त्तवा	त्वा
२	२	१३	त्तव	त्व
३	१	७	भू	म्
३	१	८	दूय	दूर्ये
३	१	१०	यांः	योः
४	१	१	तिं	ति
४	१	२	ऊं	ऊ
४	२	१३	यं	य
४	१	१३	ह	ह्र
४	१	४४	नवा	[illegible]

पत्रम्	पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
४	२	११	त्त	र्त्त
५	१	२	कां	का
५	२	३	तं	त
६	१	१२	जां	जो
६	२	४	-स	स
६	२	१३	ङ्गे	ङ्गै
७	२	१	नां	ना
८	१	३	त्रंतां	त्रता
८	१	४	बा	वा
८	१	१४	नि	ति
८	२	१	पा	प्रा
८	२	१२	ल	स्य
[illegible]	२	[illegible]	[illegible]	[illegible]

पत्रम्	पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
८	२	१४	यी	वी
१०	२	६	वि	चि
१०	२	६	र्ये	र्षे
१०	२	११	त्य	स्य
१०	२	१४	म	म्
११	२	११	स्व	स
१२	१	१	द्या	द्व
१२	२	१०	म्नि	भ्नि
१२	२	१२	या	यो
१३	१	१२	द	द्द्
१५	२	१०	न्थ	न्य
१६	१	८	यु	पु
[illegible]	२	१०	ङ्क	ङ्क्र

पत्रम्	पृष्ठम्	पङ्क्तिः	अशुद्धम्	शुद्धम्
१७	१	१०	स	म
१८	१	२	भग	भ
१८	१	९	सो	स्सो
१८	२	१	शा	शो
१८	२	४	मा	ता
१९	२	१	ध्व	च्व
१९	२	१०	न्ती	ती
१९	२	१०	ष्टा	ष्ठा
१९	२	१३	ण	णा
२०	१	११	यडा	यड
२०	१	१४	ब्रा	व्रा
२०	१	१४	त	त्
२०	२	१३	म्	साम्
२१	१	४	न्स	त्स
२१	२	१३	नि	ति
२२	२	१	पुं	पु
२३	२	४	भं	भ
२३	२	१४	श्रो	श्री
२४	१	१३	त्यैः	त्यै
२४	१	१४	अं	अ
२४	२	३	य	यं
२५	१	६	क्ति	कि
२५	१	१	व	त
२५	२	११	प्रि	त्रि
२५	२	१४	क्कयीत	क्कयति
२५	१	१०	ज्ञा	ज्जा
२६	१	१०	त्प	त्य
२६	१	१०	खं	ख
२७	१	१	ता	ती
२७	१	२	वं	व
२७	२	१	म	म
२७	२	११	ह्न	ह्व
२८	२	१२	ह्वा	ह्वा
२८	१	१३	न्व	न्य
२८	२	१	खस्रै	खैस्त
२८	४	१	नने	नेनै
२८	२	३	खीन	खनि
२८	२	६	ह्म	ह्ल
२८	२	१३	दि	धिव
२८	२	१४	नं	नी
२८	२	१५	तीशे	तिश
२८	२	१५	स्वंथः	स्वर्थः

यह पुस्तक बिना मूल्य के श्री काशी महल्ला धर्मकूप में पण्डित लक्ष्मीनारायण कविजी से मिलेगा और श्रीकाशीजी से बाहर खर्चा -) भेजने से भेजा जायगा।